स्वेष्टमर्थं करोत्येषा । क्वापि नान्यमपेक्षते ॥ तां परेऽप्यनुवर्तंते । हेतवो यदुदाहृतम्॥ १८४ ॥ बुद्धिरुत्पद्यते तादृक् । व्यवसायश्च तादृशः ॥ सहायास्तादृशा ज्ञेया । यादृशी भवितव्यता ॥ १८५ ॥ अस्तीयं भवतो भद्रे–त्युक्ते शक्रोऽपि हृष्यति ॥ न भद्रेयमितिप्रोक्ते । कंपते भय-विह्वलः ॥ १८६ ॥ सा कर्मपरिणामेनाऽर्चिता सा सृष्टिनाशकृत् ॥ सा जागर्ति प्रसुप्तेषु । तमस्यपि विजृंभते ॥ १८७ ॥ सर्वोपायविदं मत्वा । तामथो पृष्टतः स्म तौ ॥ साह प्रस्थाप-नायोग्यो । मद्भर्तान्ये च तादृशाः॥१८८॥तावूचतुः प्रमाणं त्वं । कार्येऽस्मिन् व्याप्रियस्वतत्॥ अहमन्ये च मत्तुल्या । स्तया प्रस्थापितास्ततः ॥ १८९ ॥ सहताभ्यां तयानीता । एकाक्षनिलये ऽथ ते ॥ वर्तते नगरे तत्र । महांतः पंचपाटकाः ॥ १९० ॥ मामेकं पाटकं तत्र । तीव्रमोहः प्रदर्शयन् ॥ आह संसारिजीव त्वं । तिष्ठास्मिन्नेव पाटके ॥ १९१ ॥

॥ १८७ ॥ तेणीने सर्व उपायो जाणनारी जाणीने, हवे ते बन्नेए तेणीने पूछयुं; त्यारे तेणीए कह्युं के, मारो भर्तार अने बीजा पण तेवाओ मोकलवा लायक छे. ॥ १८८ ॥ त्यारे तेओए कह्युं के, जेम तारी मरजी, माटे हवे आ कार्य कर ? पछी तेणीए मने अने मारा सरखा बीजाओने त्यांथी रवाना कर्या.॥१८९॥ तेओ बन्ने साथे तेणी हवे तेओने एकेंद्रिय स्थानकमां लेइ गइ; ते नगरमां मोटा पांच पाडाओ छे.॥१९०॥ त्यां हवे तीव्र मोहे मने एक पाडो देखाडीने कह्युं के, हे संसारिजीव ? तुं आज पाडामां रहे ? ॥ १९१ ॥

केमके, आ पाडो गोला, नीगोद, अने तेटलाज माणसोथी घणोखरो अव्यवहार राशि सरखो छे ॥१९२॥ लोक व्यवहारथी अन्य जगोए गमागमथी भेद छे; अने अनादि वनस्पति नाम छे ॥ १९३ ॥ एमकहीने तेणे एक ओरडामां मने राख्यो; अने माराप्रमाणे बीजाओने पण राख्या; अने केटलाकोने बीजी रीते राख्या ॥ १९४ ॥ त्यां मूर्छित थइने हु अनंत काल रह्यो; पछी भवितव्यता मने प्रत्येक वनस्पतिमां लावी ॥ १९५ ॥ तेवी रीते एज पाडामां मने असख्य काल राख्यो, त्यां तेणीए मने विविध आकार

यतोऽसंव्यवहारेण । तुल्यो बहुतरं ह्यसौ ॥ गोलकैश्च निगोदैश्च । जनैस्तावद्भिरेव च ॥१९२॥
भेदो लोकव्यवहृते–रन्यत्र च गमागमात्॥ किंचाऽनादिवनस्पति–वनस्पत्यभिधाकृतः॥१९३॥
इत्युक्त्वा स्थापितस्तस्मि–न्नेकापवरके ह्यहम् ॥ अन्ये तु केऽपि मन्नीत्या । स्थापिताः केऽपि चान्यथा ॥ १९४ ॥ अथानंतं स्थितः कालं । तत्राहं मत्तमूर्छितः ॥ ततः प्रत्येकचारित्वं । भवितव्यतया कृतम् ॥ १९५ ॥ तादृशः स्थापितोऽसंख्यं । कालमत्रैव पाटके ॥ ददौ सा गुटिकां तत्र । नानाकारप्रकाशिकाम् ॥ १९६ ॥ सा कर्मपरिणामेन । जन्मवासंप्रतीष्टकृत्॥ दत्तैकभववेद्यास्याः । प्रागेव श्रांतिशातये ॥ १९७ ॥ पूर्वस्यां परिजीर्णायां । दत्तवत्यपरापराम् ॥ तामसंव्यवहारे सा । सूक्ष्ममेवाकरोद्वपुः ॥ १९८ ॥ एकाक्षनिलये त्वेषा । तया गुटिकयाऽकरोत् ॥ पर्याप्तकमपर्याप्तं । क्वचित्सूक्ष्मं च बादरम् ॥ १९९ ॥ साधारणं च प्रत्येकं । फलपुष्पांकुरादिकम् ॥ मूलत्वक्स्कंधशाखादि । तथा बीजलतादिकम् ॥ २०० ॥

करनारी गुटिका आपी ॥ १९६ ॥ जन्मवासप्रते इष्ट करनारी एवी ते गुटिका एकभव सुधि चाले तेटली, कर्मपरिणामे पेहेलेथीज तेणीने थाक न लागवा माटे आपी हती ॥ १९७ ॥ पूर्वनी गुटिका खलास थवाथी, बीजी बीजी देतां थकां तेणीए अव्यवहार राशिमां (मारु) शरीर सूक्ष्मज कर्यु हतु ॥ १९८ ॥ एकेंद्रियमां तेणीए ते गुटिकाथी, मने पर्याप्तो, अपर्याप्तो, तथा कोइक समये सूक्ष्म अने बादर कर्यो ॥ १९९ ॥ वली तेथी मने साधरण, तथा प्रत्येक एवा फल, फूल, अंकुरा, मूल,

छाल, स्कंध, शाखा, बीज तथा लतादिक रूप कर्यो. ॥ २०० ॥ तेवी दशावाला एवा मने लोकोए छेद्यो, भेद्यो, काप्यो, तथा पील्यो; अने तेवी रीतनो मने जोया छतां पण ते भवितव्यताए उपेक्षी मेल्यो. ॥ २०१ ॥ हवे छेल्ली गुटीका खलास थवाथी, बीजी देइने ते मने पृथ्वीकायमां लेइ गइ; अने त्यांहुं असंख्य काल रह्यो. ॥ २०२ ॥ त्यां सूक्ष्मादिक भेदोने भजनारा एवा मने लोकोए चूर्यो तथा दल्यो; अने एवीज रीते अप्काय, तेउकाय अने वायुकायमां मने मेल्यो. ॥ २०३ ॥ हवे भवितव्यताए मारुं स्थानाजीर्ण दूर करवाने इच्छयुं; तेथी तेणीए मने " विकलेंद्रिय निवास " नामना नगरमां लीधो. ॥ २०४ ॥ त्यां बे

भिन्नो भिन्नश्च लूनोऽहं । लोकैः पिष्टश्च तादृशः ॥ दृष्टोऽप्युपेक्षितो हंत । भवितव्यतया तया ॥ २०१ ॥ सार्थान्त्यगुटिकायां मां । जीर्णायां क्षितिपाटके ॥ दत्वान्यामनयत्तत्रा—ऽसंख्य-कालमहं स्थितः ॥ २०२ ॥ सुक्ष्मादिभेदभाक्तत्र । चूर्णितो दलितो जनैः ॥ एवं जला-ग्निपवने—ष्वेकाक्षनिलये धृतः ॥ २०३ ॥ स्थानाजीर्णमथैच्छन्मे । ऽपनेतुं भवितव्यता ॥ वि-कलाक्षनिवासाख्ये । नगरेऽहं तया धृतः ॥ २०४ ॥ नियुक्तो भूभुजा तत्र । द्वींद्रियादित्रिपा-टके ॥ त्रातास्ति शल्यसंपर्को । मायापरिणतिप्रियः ॥ २०५ ॥ प्रथमे पाटके तत्र । भार्यया द्वींद्रियाभिधे ॥ मनाक् विस्पष्टचैतन्यः । कृमिरूपोऽशुचिः कृतः ॥ २०६ ॥ मूत्रांत्रक्लिन्नजठरे। विलुठंतं च वर्चसि ॥ मां दृष्ट्वा कृमिभावेन । सा दुर्भार्या प्रहृष्यति ॥ २०७ ॥ जलूकाभाव-मापाद्य । गुटिकायाः प्रभावतः ॥ विडंबितस्तया रोगि—रक्ताकर्षणकर्मणा ॥ २०८ ॥

इंद्रिय आदिक त्रणे पाडाओमां कर्मपरिणाम राजाए स्थापेलो, अने मायापरिणति नामे स्त्रीवालो शल्य संपर्क नामे अधिकारी हतो. ॥ २०५ ॥ त्यां मारी भवितव्यता नामनी स्त्रीए बे इंद्रिय नामना पाडामां मने जरा चैतन्यवालो अपवित्र कृमिरूपे कर्यो. ॥ २०६ ॥ मूत्र अने आंतरडांथी खरडाएला जठरमां रहेली विष्टामां कृमिरूपे लोटता एवा मने जोइने ते दुर्भगस्त्री हर्ष पामे छे. ॥ २०७ ॥ गुटिकाना प्रभा-वथी मने जलोरूप बनावीने, रोगीनुं रुधिर खेंचाववावडे मने तेणीए विडंबना करी. ॥ २०८ ॥

पछी गुटिकादानथी शंख करीने शखवालाओए मने छेद्यो; तथा पूतरूप करीने नचाव्यो; एवी रीते मने बहु दुःखी कर्यो ॥ २०९ ॥ सात क्रोड लाख कुलोमां रह्यो; तथा त्यां असख्य रूपोथी रडतो थको हु बहु भम्यो ॥ २१० ॥ पछी मने बीजी गोली आपीने ते स्त्री त्रेंद्रिय नामे पाडामां लेइ गइ; तथा त्यां असख्य रूपोथी भमाव्यो ॥ २११ ॥ त्यां आठक्रोड लाख कुलोमां जुदा जुदा लोकोए कीडी आदिकना रूपथी मने पील्यो, बाल्यो, तथा मर्दित कर्यो ॥ २१२ ॥ त्यांथी गोली देइने मने त्रीजा पाडामां मेल्यो;

छेदितो गुटिकादाना—च्छंखं कृत्वाथ शांखिकैः ॥नर्तितः पूतरीकृत्य । बहुधैवं विडंबितः॥२०९॥ कुलाना कोटिलक्षेषु । पाटके सप्तसु स्थितः ॥ तत्राऽसंख्यैरहं रूपै—रटद् बहुतरं रटन्॥२१०॥ अथान्यगुटिकादाना—न्नीतोऽहं त्रीद्रियाभिधे ॥ पाटके भ्रामितो रूपै—रसंख्यैस्तत्र भार्यया ॥ २११ ॥ कुलानां कोटिलक्षेषु । तत्राष्टसु पृथग् जनैः ॥ पिपीलिकादिरूपेण । पिष्टो दग्धश्च मर्दितः ॥ २१२ ॥ ततश्च गुटिकादाना--त्तृतीये पाटके धृतः ॥ कुलानां कोटिलक्षेषु । नवस्वपि विडंबितः ॥ २१३ ॥ पतंगमक्षिकादंश--वृश्चिकाकारधारकः॥तत्राहं चतुरक्षः स- न्नन्वभूव विडंबनाम् ॥ २१४ ॥ अथ प्रहृष्टा मम सा । दयिता भवितव्यता॥प्रस्थापनाय गुटिकां। प्रायुंक्त नगरांतरे ॥ २१५ ॥ यत्पंचाक्षपशुस्थानं । शल्यसंपर्कपालितम् ॥ अस्ति सार्धत्रिपंचाश--त्कोटीलक्षकुलं पुरम् ॥ २१६ ॥ पंचाक्षा गर्भजास्तत्र । जलस्थलनभश्चराः ॥ संमूर्छिताश्च विद्यंते । तेष्वहं भ्रमितस्तया ॥ २१७ ॥

त्या नवक्रोड लाख कुलोमां हुं दुःखी थयो ॥ २१३ ॥ त्यां चोरिंद्रिय थइने, पतग, माखी, डांस, तथा वींछीनु रूप धारीने मे बहु दुःख अनुभव्यु ॥ २१४ ॥ पछी ते मारी भवितव्यता स्त्री मारापर तुष्टमान थइ; अने बीजा नगरमां मोकलवा माटे मने गोली आपी ॥ २१५ ॥ ते नगर पंचेंद्रिय पशुओनु स्थान, शल्य सपर्कथी रक्षित थएलुं,तथा साडा त्रेपन क्रोड लाख कुलोवालु छे ॥२१६॥त्यां पचेंद्रि गर्भज तथा

संमूर्छिम जलचर, थलचर अने खेचरो हता; तेओमां तेणीए मने भमाव्यो. ॥ २१७ ॥ त्यां कार्य विना देडकानो आकार धारीने हुं आरव्यो; तथा मत्स्यरुपे माछीमारोए मने भेद्यो, छेद्यो तथा बाल्यो. ॥ २१८ ॥ वली त्यां, ससला, शुंड, तथा हरिणरुप थइने पाराधिओथी पीडित थयो; तथा चंदनघो, सर्प अने नोलीआंरुप थइने परस्पर भक्षणथी दुःखित थयो ॥२१९॥ वली त्यां कागडा, तथा घूवडादिक रुपे में अतुल्य दुःख सह्युं, अने असंख्य लोकोथी भरेला एवा ते स्थानमां हुं घणो काल भम्यो ॥२२०॥ हवे एक दहाडो हुं मृग थइने यूथ मध्ये सुखे रह्यो हतो, त्यां रागमां लीन थवाथी पाराधिए बाणो

रटितोऽहं विनाकार्यं । दर्दुराकारधारकः ॥ मत्स्यरुपं दधच्छिन्न--श्छिन्नो दग्धश्च धीवरैः ॥ २१८ ॥ शशशूकरसारंग- रूपो व्याधैः कदर्थितः ॥ गोधाऽहिनकुलाकारो । दुःखितो भक्षणान्मिथः ॥ २१९ ॥ काकोलूकादिरूपेषु । सोढं दुःखं मयाऽतुलम्॥ असंख्यजनसंकीर्णे तत्र पर्यटितश्चिरम् ॥ २२० ॥ अथान्यदा मृगो जातो । यूथमध्ये स्थितः सुखम् ॥ नादाक्षिप्तः शरेणोच्चै--र्व्याधेन निहतो मृतः ॥ २२१ ॥जातोऽथ करियूथेशो। विचरन् शल्लकीवने॥ श्रितः करेणुवृंदेन । निर्मग्नः सुखसागरे ॥२२२॥ संत्रस्तं करियूथं चाधूमं चाशकमुत्थितम् ॥ अश्रौषं वेणुविस्फोट--रवं च नवमन्यदा ॥ २२३ ॥ संभ्रांतोऽहं ततः पश्चा । न्नग्नो भून्नागमीक्षितुम् ॥ उत्तानः पतितः कूपे । संप्राप्तस्तीव्रवेदनाम् ॥ २२४ ॥ यूथत्राणाऽसमर्थस्य । ममेदं युक्तमागतम् ॥ इतिभावयता दुःखं । सप्तरात्रं तितिक्षितम् ॥ २२५ ॥

मार्याथी मृत्यु पाम्यो. ॥ २२१ ॥ पछी हाथीओना यूथनो हुं स्वामी थयो, त्यां शल्लकीना वनमां विचरतो थको हाथणीओना समूह सहित सुख सागरमां पड्यो. ॥ २२२ ॥ एक दहाडो त्यां हाथीना भययुक्त टोलाने, तथा उछलता धुंवाडाने में जोयो; तथा वांसोना फाटवानो शब्द सांभल्यो. ॥ २२३ ॥ पछी संभ्रांत थइने हुं पाछल पृथ्वीने जोवा लाग्यो, त्यां उतावलथी कुवामां पड्यो, अने तीव्र दुःख पाम्यो, ॥ २२४ ॥ यूथना रक्षणमां असमर्थ एवा मने आ योग्य दशा आवी, एम भावतां थकां में सात

रात्रिओ सुधि पीडा भोगवी ॥ २२५ ॥मारा आ शुभ भावथी मारी स्त्री भवितव्यता खुशी थइ; अने मने एक सुदर पुरुषने देखाड्यो ॥ २२६ ॥ अने मने कह्युं के, हे महाभाग ! आ पुण्योदय नामना पुरुषने मे खुशी थइने तने मददगार तरिके आप्यो छे. ॥ २२७ ॥ हवे मने पूर्वे दीधेली गोली खलास थवाथी, तेणीए मने बीजी गोली आपी; तथा आ पुण्योदय गुप्त रह्यो थको तारा भलामाटे थओ! एम तेणीए मने आशिष पण आपी. ॥ २२८ ॥ एवी रीते अनुसुंदर राजारूपी ससारिजीव कहेते छते पुडरीक नामना भव्ये शका लावीने महाभद्राने कह्यु के, हुं आ सघलो भावार्थ समजी शक्यो थनी; त्यारेतेणीए

अनेन शुभभावेन । तुष्टा मे भवितव्यता॥पुरुषं सुंदराकार--मेकं प्रादर्शयत्पुरः॥२२६॥उवाच च महाभाग । नरः पुण्योदयो ह्ययम् ॥ सहायोऽयं मया । दत्तो भवतः परितुष्टया ॥२२७॥ जीर्णाथ पूर्वदत्ता मे।गुटिकाऽन्यां ददौ च सा ॥ गुप्तः पुण्योदयो भूत्यै । भूयादित्याशिषं ददौ ॥२२८॥इति कथयति तस्मिन् धीविशाला बभाषे । वचनमविदितार्थं शंकमानोऽथ भव्यः ॥ स्फुटमकथयदर्थं साऽपि सामान्यरूपं । प्रथनकृतविलंबः भव्यशोभां निहंति ॥२२९॥ भवति हि भवजंतु. सर्वएवैकनामा । भवविलसितभेदं याति चावर्तमानः ॥ तदखिलमुपपन्नद्रव्य-पर्यायरूपं । कलयति सुमतिर्यस्तं वृणीते यशःश्रीः ॥ २३० ॥

इति श्रीवैराग्यकल्पलतायां तिर्यग्गतिविपाकवर्णनो नाम तृतीयः स्तवकः समाप्तः ॥ श्रीरस्तु ॥

पण सामान्य प्रकारे तेनो प्रगट अर्थ कही देखाड्यो; केमके; तेमां विलब करवाथी भव्यशोभा चाली जाय छे ॥ २२९ ॥ भवमां रहेला सर्व जतु एक नामवाला (भवजतु) होय छे; पण फरता फरता भवचेष्टितना भेदने प्राप्त थाय छे; पण जे सुबुद्धि माणस ते सर्वने द्रव्यपर्यायरूपे जाणे छे; तेने यशनी लक्ष्मी वरे छे ॥ २३० ॥ (आ काव्यने छेडे पण " यश " शब्द मुकीने श्री यशोविजयजी महाराजें पोतानी कृति सूचवी छे.)

चतुर्थःस्तबकःप्रारभ्यते.

संसारिजीव उवाच--हवे संसारिजीव फरीने कहेछे. हवे विशाल एवी मनुष्यगतिनामे नगरीना भरत नामना पाडामां जयस्थल नामे नगर छे, तथा तेनो राजा पद्म नामे पृथ्वीपति छे. ॥ १ ॥ जगतना मनमां रोपेलछे हर्षकंद जेणीए एवी ते राजाने नंदा नामे पटराणी हती; तेणीनी कुक्षिमां मारी ते स्त्रीए मने मुक्यो; अने अवसर आव्ये मारो जन्म (पण) थयो ॥ २ ॥ मने पुत्र थयो, एवी रीते वधेला अभिमान सुखथी नंदा आनंदित थइ अने प्रमोदकुंभ नामना चाकरनी वधामणीथी राजाए पण खुशी

इतश्च पुर्यां नृगतौ विशाले । सत्पाटके यन्नरताभिधाने ॥ जयस्थलं नाम पुरं तदीशः । पद्माभिधोऽभून्मघवा पृथिव्याः ॥ १ ॥ जगन्मनोरोपितहर्षकंदा । नंदाभिधा तन्महिषी बभूव ॥ प्रवेशितोऽहं प्रियया तयास्याः । कुक्षौ सपुण्यः समये प्रसूतः ॥ २ ॥ ननंद नंदा तनयो ममाभू--दितिप्रवृद्धादभिमानसौख्यात् ॥ प्रमोदकुंभाभिधदासवाक्या--द्राजाऽपि तुष्टः प्रददौ वसूनि ॥ ३ ॥ विनिर्मितो जन्ममहोत्सवो मे । व्यधायि नंद्युत्तरवर्धनाख्या ॥ तिरोहिता प्रागभिधा ततश्च । ममाऽप्यभूत्तत्तनयाभिमानः ॥ ४ ॥ सिंचन्निवाक्ष्णोरमृतं विलासै । स्तातस्य मातुश्च तथा जनानाम् ॥ धात्रीभिरुच्चैरथ लाल्यमान--स्त्रिवार्षिकोऽभूवमनूनशर्मा ॥ ५ ॥ इतश्च याऽंतःपरिवारमध्ये । बभूव मे धात्र्यविवेकिताख्या ॥ असूत मज्जन्मदिने सुतं सा । कृतं च वैश्वानरनाम तस्य ॥ ६ ॥

थइने तेने धन आप्युं ॥ ३ ॥ वली मारो जन्मोत्सव कर्यो; तथा मारुं नंदिवर्धन नाम पाडयुं अने त्यारथी मारुं प्रथमनुं नाम लुप्त थयुं; मने, पण पुत्रपणानुं अभिमान थयुं. ॥ ४ ॥ विलासोथी मातपितानी तथा लोकोनी आंखो प्रते जाणे अमृत सिंचतो होउं नहीं जेम, तेम धात्रीओथी लालन करातो एवो हुं अत्यंत सुखी थयो थको त्रण वर्षनो थयो ॥ ५ ॥ हवे अंतःपुरना परिवारमां अविवेकिता नामनी जे मारी धावमाता हती, तेणीए पण मारा जन्म दिवसे एक पुत्रने जन्म आप्यो, अने तेनुं नाम वैश्वा-

नर पाड्यु ॥ ६ ॥ (तेवैश्वानर केवो हतो ? तोके) खेद अने वैररुप निचा पगवालो, द्रोह अने इर्षारुप कठिन जंघावालो, अक्षमा अने चित्तना पश्चातापरुप खरनचडा साथळवालो, तथा चुगलीरुप लांबा कटिप्रदेश वालो हतो ॥ ७ ॥ वली ते परना मर्मोने भेदवारुप सांकडी छातीथी कोठा सरखा मध्य भागने धारण करनारो, तापथी दीप्त थएलो, तथा अन्यायरुप दृढ खभाओवालो हतो ॥ ८ ॥ वली ते प्यार तथा मात्सर्यरुप वेडोळ हाथवालो, क्रूरतारुपी लांबी अने उंची गरदनवालो, असत्य वचनादि-

विषादवैराततनिम्नपादो । द्रोहान्यसूयाकठिनोरुजंघः ॥ अक्षांतिचित्तानुशयासमोरुः । प्रलं-वपैशून्यकटिप्रदेशः ॥ ७ ॥ मध्यं दधानःपरमर्मभेद--संज्ञं च कोष्ठाकलितप्रमाणम् ॥ उरःस्थलेनातिविसकटेन । तापेन दीप्तो दृढदुर्नयांसः ॥ ८ ॥ क्रारत्वमात्सर्यविरूपबाहुः क्रूरत्वदीर्घोच्चशिरोधराभृत् ॥ असत्यवापादिविकीर्णदंत । चंण्डत्वनिर्भर्त्सनशून्यकर्णः ॥९॥ हास्योदधानश्चिपटां च नासां । स्थानाकृतिं तामसभावसंज्ञाम् ॥ रौद्रत्वनैर्घृण्य-सुरक्तनेत्र- त्रिकोणदुष्टाचरणाख्यशीर्षः ॥ १० ॥ असंगतापिंगलकेशभारो । विराधना सूत्रभृतत्रितंतुः ॥ मया प्रदृष्टोऽथ स विप्रसुनु । दौःशील्यलीलानिरतःकुनीतिः ॥ ११ ॥ निरीक्षिते तत्र बभूव पूर्वा--भ्यासेन मे स्नेहविलासि चेतः ॥ अपेक्षते स्वीयबलप्रकर्षा--त्प्रसं-स्तवस्नेहविधौ विशेषम् ॥ १२ ॥

रुप छुटा दांतो वालो, तथा प्रचंडता अने भर्त्सनारुप शून्य कर्णोवालो हतो ॥ ९ ॥ वली ते हास्यरूपी चपटी नासिकावालो, तामसभाव नामनी स्थानाकृति वालो, रौद्रता अने निर्दयतारुपी लाल आंखो वालो, अने दुराचरणरुपी त्रिकोण मस्तकवालो हतो ॥ १० ॥ वली असंगतारुपी पीला केशोना समूह वालो, विराधनारुपी सूतरना त्रण दोरावालो (जनोइवालो) दुःशीलपणानी क्रीडामां आसक्त थएलो, तथा खोटी नीतिवालो, एवा ते वैश्वानर नामना ब्राह्मण पुत्रने में जोयो ॥ ११ ॥तेने जोवाथी

पूर्वाभ्यासथी मारूं चित्त तेनामां स्नेहवालुं थयुं; केमके, स्तुति अने स्नेहनी विधिमां आत्मबलना प्रकर्षथी विशेषनी अपेक्षा होती नथी ॥ १२ ॥ मने पोताने वश थएलो जोइने ते दुष्टे मारुं पडखुं कदापि पण तज्युं नहीं; पछी पोताना वैरीना संगवालो मने जोइने मारो पुण्योदय नामनो मित्र साक्षात मारा पर अत्यंत क्रोधवालो थयो ॥ १३ ॥ अने तेणे विचार्यु के, अहितमां मूढ एवा आने हित कहीने उपदेश देवो लायक नथी; केमके महादेव हजु पण भयंकर एवा सर्पोना वलयने तजतो नथी. ॥ १४ ॥ वली आ नंदिवर्धन मारो आश्रित छे, माटे जोके ते गुणोविनानो छे, तो पण, नहीं क्षोभेला, गंभीर

वशंवदं स्वस्य स मामवेक्ष्य । जहाति पार्श्वं न कदापि दुष्टः ॥ स्ववैरिसंसर्गमवेक्ष्य साक्षात्पुण्योदयो मित्रमतीव रुष्टः ॥ १३ ॥ दध्यौ च नाऽसावुपदेशयोग्यो । हिताभिधानादहिते विमूढः ॥करालमद्यापि न कालकंठो । व्यालावलीनां वलयं जहाति ॥ १४ ॥ नचाश्रितोऽसौ मम हातुमर्हो । विनैव वेलां गुणवर्जितोऽपि ॥ अक्षुब्धगंभीरमहाशयस्य । तृणादिसंघातइवांबुराशेः ॥ १५ ॥ इदं विचिंत्य स्तिमितस्वभावो । रुष्टोऽपि तस्थौ स ममांतरेव ॥ ततश्च वैश्वानरतश्च भास्व--न्मणिः फणींद्रो विषवानभूवम् ॥ १६ ॥ अवारितस्तेन तथैव वैश्वा--नरेण दाहप्रकृतिः कृतोऽहम् ॥ अक्षालितः शैलाइवांबुदेन । जातो यथा दाहकरः श्रितोऽपि ॥ १७ ॥ प्रकीभूतो भीतिभृतोऽथ मत्तो । बालाः कुलीना अपि रोषपूर्णात् ॥ भजंति मामेष महाप्रभावः । पुण्योदयस्यापि परस्य बुद्धः ॥ १८ ॥

अने महान आशयवाला एवा समुद्रे जेम घासनो समूह, तेम मारे अवसरविनाज (पक्षे–वेलाविनाज) तेने तजवो योग्य नही ॥ १५ ॥ एम विचारिने ते क्रोधित थया छतां पण मारा अंतःकरणमांज रह्यो, हवे ते वैश्वानरनी सोबतथी हुं चळकतामणिवाला झेरी नागतुल्य थयो. ॥ १६ ॥ हवे ते पुण्योदये नहीं अटकाव्याथी मने ते वैश्वानरे दाहप्रकृतिवालो कर्यो; अने तेथी, मेघथी आश्रित थएलो एवो पण नहीं धोवाएलो जेम पर्वत तेम हुं दाहकारक थयो. ॥१७॥ रोषथी भरेला एवा हुंथी डरता एवा कुलीन

पालको पण क्रीडा करता थका मने सेवे छे; एवो महाप्रभाव जोके पुण्योदयनो हतो, छतां मे ते परनो जाण्यो ॥ १८ ॥ दीपेल छे तेज, मति, धैर्य अने वीर्य जेणे एवा वैश्वानरना प्रेममां तत्पर थएला मने हवे पिताए उत्तम आचार्यने सोंप्यो; अने त्या भाग्यथी उत्तम विनाज कलाओनो समूह हु शीख्यो ॥ १९ ॥ हेतुसहित अथवा हेतुरहित सर्व बालकोनी साथे क्लेश करतो थको वैश्वानरथी आलिंगित थएल छे मूर्ति जेनी एवो हु, ते बालकोने तथा गुरुने घणोज खेदकारक नीवड्यो ॥ २० ॥ गुरु ज्यारे मने शीखामण देता, त्यारे मे तेनो पण तिरस्कार कर्यो; त्यारे बीजा ते शुं हीसाबमां? तो पण आ राजानो

वितीर्णतेजोमतिधैर्यवीर्य--वैश्वानरप्रेमपरोऽथ पित्रा ॥ दत्तोऽहमाचार्यवरस्य भाग्या--द्विनोद्यमं शिक्षितवान् कलौघम् ॥ १९ ॥ सहेतुकं वाप्यपहेतुकं वा । समस्तबालैः कलहायमानः ॥ वैश्वानरालिंगितमूर्तिरुच्चैः । खेदाय तेषां च गुरोश्च जातः ॥ २० ॥ प्रतिब्रुवाणो गुरुरप्यलज्जि । मया तिरस्कारपदं परे के ॥ महीभृतः पुत्र इतिप्रतीते । तथापि मय्येष जहौ न रागम् ॥ २१ ॥ वैश्वानरस्यैव गुणोऽखिलोऽय--मितीह रागो विधृतो मयोच्चैः ॥ असावपि प्राणसमाय मह्यं । रसायनं क्रूरमनो ददौ द्राक् ॥ २२ ॥ जगौ च मच्छक्तिभवं किलैत--द्बलस्य वृद्ध्यै विततायुषश्च ॥ गृहाण तत्त्वं परिभुंक्ष्व काले । फलेग्रहिः स्नेहतरुर्ममास्तु ॥ २३ ॥ अत्रांतरे कश्चिदवोचतेष्टं । स्थानं त्वयाऽसौ गमितो ह्यनेन ॥ वैश्वानरेणास्य विचारितोऽर्थो । भाव्येष गत्वा नरके ततायुः ॥ २४ ॥

पुत्र छे, एम जाणीने ते गुरुए माराविषेनो राग तज्यो नहीं ॥ २१ ॥ आ सघळो वैश्वानरनो गुण छे; एम विचारि मे तेनाप्रते घणो राग धर्यो; अने क्रूर मनवाला एवा तेणे प्राण सरखा एवा मने तुरत रसायन आप्यु ॥ २२ ॥अने वळी कह्यु के, मारी शक्तिथी उत्पन्न थएलु आ रसायन बलनी तथा आयुष्यनी वृद्धिमाटे छे; माटे तु ते ग्रहण कर? अने खा? तथा मारु स्नेह रूपी वृक्ष अवसर आव्ये फलद्रूप थाओ? ॥ २३ ॥ एटलामा कोइए कह्यु के, ते आने इष्ट स्थानके पहोंचाड्यो; तेनो अर्थ आ वैश्वानरे विचार्यो के, आ

नरके जइने विस्तीर्ण आयुष्यवालो थशे. ॥ २४ ॥ हवे में ते रसायन तेना हाथमांथी लीधुं, तथा तेनी मनोहर शिखामण स्वीकारी के, तारे आमांथी में कहेला अवसरे एकेक गोली खावी. ॥ २५ ॥ हवे मारी देखरेख राखनारा विदुरे, मारुं गुरुने तथा कुलीन बालकोने दुःखदेवादिक दुष्टाचरण राजाने कह्युं; तेथी ते बहु दुःखित थयो. ॥ २६ ॥ तथा कलागुरुने बोलावीने तेमणे पूछ्युं के, कुमार केटली कलाओ भण्यो? त्यारे तेणे कह्युं के, सर्व कलाओनो समूह आने वश थयो छे, हवे कंइं पण बाकी

गृहीतमेतन्मयकास्यहस्ता–दंगीकृता तस्य च चारुशिक्षा ॥ त्वद्भ्या त्वयैकैकगुटी किला-स्मा–त्संज्ञाप्यमानेऽवसरे मयेति ॥ २५ ॥ अथो नियुक्तो विदुरो मदीयं । न्यवेदयद्दुर्ललितं नृपाय ॥ सर्वं कलाचार्य कुलीनबाल–कदर्थनाद्यं स ततोऽति दूनः ॥ २६ ॥ पप्रछ आकार्य कलागुरुं मे । कलाकुमारः कीयतीरज्ञाणि ॥ स प्राह सर्वोऽपि कलाकलापो । वश्योऽस्य जातो न किमप्यथोनम् ॥ २७ ॥ अपि प्रकृत्यामलमस्य रूपं । न ज्ञाति वैश्वानरसंगतस्तु ॥ इंदोः कलंकादिव कर्दमाञ्ज–न्महोत्पलस्येव च कंटकौघात् ॥२८॥ द्रुमा इवास्याप्रशमप्रवा-है–रुत्खातमूलाः क्षयिणो गुणौघाः ॥ तन्नैष यत्नः फलवानितीदं । श्रुत्वा परं तापमवाप राजा ॥ २९ ॥ आव्हास्त वैश्वानरपापमित्र--त्यागाय मामेष च वेदकेन ॥ स प्राह राज-न्नपि हापितोऽस्य । गतिःस वैश्वानर एव नूनम् ॥ ३० ॥

नथी. ॥ २७ ॥ आनुं स्वभावथी निर्मल एवुं पण रूप, कादव सरखा कलंकथी जेम चंद्रनुं, तथा कांटा-ओना समूहथी जेम कमलनुं तेम वैश्वानरना संगथी शोभतुं नथी. ॥ २८ ॥ वृक्षोनी पेठे आना गुणोना समूहो अशांततारूपी प्रवाहथी मूलमांथी उखडीने क्षय पामशे; माटे आ प्रयत्न फलद्रूप थशे नहीं; ते सांभलीने राजा बहु खेद पाम्यो. ॥ २९ ॥ पछी तेणे मने ते पापी मित्र वैश्वानरना त्याग माटे वेदक मारफते कहेवराव्युं; त्यारे ते वेदके कह्युं के, हे राजन्! आने तेनी मित्राइथी छोडाव्या छतां पण तेनी

गति तो नरेश्वर ते वैश्वानरज छे. ॥ ३० ॥ वली ग्रा ते वैश्वानर नामना पापी मित्रना सगथी वैश्वानरज थयो छे ! ! माटे बलात्कारे तेने छोडावी शकाय तेम नथी; पण शांति माटे उपाय शोधवो ॥ ॥ ३१ ॥ राजा, गुरुथी सम्मत थएली एवी वेदकनी ते वाणी सांभलीने अत्यत विचारमां पड्यो; तथा पछी कहेवा लाग्यो के, सिद्ध पुत्र तथा जैनधर्मी एवो विदुर आ उपायनो जाणकार छे ॥ ३२ ॥ पछी राजाए खुशी थइने ते विदुरने बोलावीने पुत्रना कुसगत्यागनो हेतु पूछ्यो; त्यारे तेणे पण बुद्धिथी

अयं हि वैश्वानरपापमित्र—सगेन वैश्वानर एव जातः ॥ बलादतो मोचयितुं न शक्यो । मृग्यः परं शांतिविधावुपायः ॥ ३१ ॥ श्रुत्वा नृपो वेदकवाचमेनां । गुरोर्मतां ह्रद्दहने निमग्न. ॥ जगावथोच्चैर्विदुरोऽस्त्युपाय--ज्ञातात्र जैनो नृपसिद्धपुत्रः ॥ ३२ ॥ हृष्टस्तमाकार्य नृपोऽथ हेतुं । पप्रच्छ पुत्रस्य कुसंगमुक्तेः ॥ बुद्ध्या स विज्ञाय जगौ य एको । हेतुस्तमत्रावहितो ब्रवीमि ॥ ३३ ॥विनिर्गतोपद्रवराशिचेतः । सौंदर्यमत्रास्ति पुरं प्रसिद्धम् ॥ लोकं वसंतं किल न्नाविन्नइं । न तत्र मुष्णंति कषायचोराः ॥ ३४ ॥ अनारतं विस्तृतसौरभ्नं त- त्कल्याणवल्लीकुसुमैर्गुणौघैः ॥ अलंकृते शीतलशीलगेहै । नं तत्र तापो लभ्नतेऽवकाशम् ॥ ३५ ॥ भूमीपतिस्तत्र शुभाशयाख्यो । विभ्नर्ति राज्यं जितराजराजः ॥ सतां हिताय्ताविहितव्यये च । कृतोद्यमो दुष्टविनिग्रहे च ॥ ३६ ॥

जाणीने कह्युं के, जे एक उपाय छे, ते हु कहु छु ॥ ३३ ॥ गएल छे उपद्रवोनो समूह जेमांथी एवु चित्तसौंदर्य नामे एक प्रसिद्ध नगर छे; थनार छे कल्याण जेओने एवा त्या वसता लोकोने कषायरूपी चोरो लुंटता नथी ॥३४॥ गुणोना समूहोरूपी कल्याण वल्लीना पुष्पोथी हमेशा विस्तारवाली सुगधिवालु ते नगर छे; तथा शीतल एवा शीलरूपी वृक्षोथी शोभितां एवां ते नगरमां तापने अवकाश मलतो नथी ॥ ३५ ॥ ते नगरमा जितेल छे मोटा राजाओने जेणे एवो शुभाशय नामे राजा राज करे छे; तथा ते सज्जनोना

हितमां अने दुष्टोना नाशमां उद्यमी छे. ॥ ३६ ॥ कलंकोथी मुक्त थएलो एवो आ राजा क्रीडामात्रथी पण जे प्रदेशने शोभावे छे, त्यांथी, सिंहना निवासवाला वनथी जेम हाथीओ तेम, अंतरंग शत्रुओ नाशी जाय छे. ॥ ३७ ॥ धीरज, स्मृति, लज्जा, करुणा तथा शांततादिक रूप गुणोरूपी रत्नोना समूहोथी तेनो भंडार भरेलो छे; तथा विशाल एवा (अढार हजार) शीलांगरथोथी हमेशां तेनी अनुकुल लक्ष्मी वृद्धि पामे छे. ॥ ३८ ॥ सुर अने असुरनी स्त्रीओना महाविलासथी पण नथी कंपेलुं चित्त जेनुं एवा

अलंकरोत्येष कलंकमुक्तः । क्रीडावशेनापि हि यं प्रदेशम् ॥ ततः प्रणश्यंत्यरयोऽतरंगा । मृगारिसंसर्गिवनादिवेभाः ॥ ३७ ॥ धृतिस्मृतिह्रीकरुणाशमाद्यैः । कोशोऽस्य पूर्णो गुणरत्नवृंदैः ॥ विशालशीलांगरथैरजस्रं । प्रवर्धतेऽस्याप्रतिपंथिलक्ष्मीः ॥ ३८ ॥ सुरासुरस्त्रैणमहाविलासा--प्रकंप्यचित्तेऽपि हि साधुलोके ॥ आसक्तिदात्री स्थिरताभिधास्य । सौंदर्यलक्ष्मीनिधिरस्ति देवी ॥ ३९ ॥ भाति प्रतीकेऽपि निरूपितेऽस्या । भस्मैव रूपं सुरसुंदरीणाम् ॥ प्रतिप्रतीकं तु निरूपितेयं । वेद्यांतरं शून्यमिवातनोति ॥ ४० ॥ पुत्री तयोरस्ति निधिर्गुणाना--मुत्पत्तिभूमिर्बहुविस्मयानाम् ॥ सुधौघवन्निर्मितपापशांतिः । क्षांतिर्गतभ्रांतिरुदारकांतिः ॥ ४१ ॥ निरीक्षणेऽस्यापि हि मूल्यमस्या--श्चिंतामणिर्नार्हति भूरितेजाः ॥ आलिंगनं यस्तु विधास्यतेऽस्याः । स शक्रचक्रादपि पीनपुण्यः ॥ ४२ ॥

पण साधुलोकने आसक्त करनारी, अने सौंदर्यरूपी लक्ष्मीना भंडार सरखी एवी तेनी स्थिरता नामे राणी छे. ॥ ३९ ॥ ते स्त्रीनी छबी जोतां पण देवांगनाओनुं रूप भस्म सरखुंज लागे छे; तथा तेनुं दरेक अवयव जोवाथी वेद्यांतर शून्य तुल्य लागे छे. ॥ ४० ॥ तेओने गुणोना भंडार सरखी, घणां आश्चर्योने उत्पन्न करनारी अमृतना समूहनी पेठे करेल छे तापनी शांति जेणे, भ्रांति विनानी, तथा उदार कांतिवाली क्षांति (क्षमा) नामे पुत्री छे. ॥ ४१ ॥ तेणीना जोवाना पण मूल्यप्रते महातेजस्वी एवुं चिंतामणि

रत्न पण लायक नथी ; त्यारे जे पुरुष तेणीनु आलिगन करशे, ते तो इन्द्रोना समूहथी पण वधारे पुण्य शाली होशे ॥ ४२ ॥ शांतपणामां रहेला माणसोने तेणीनी स्नेहाल एवी दृष्टिरूपी लेहेरी जेवी शीतलता करे छे, तेवी शीतलता खरेखर तापयुक्त थएलाओने अमृत, चदन, तथा चद्रादिको पण करी शकता नथी ॥ ४३ ॥ हे राजा ! ते क्षांति कुमारिका स्वभाथीज वैश्वानरप्रते वेरभाव राखे छे; माटे ते कन्याने परणीने आपणो आ नदिवर्धन कुमार प्रेरणा कर्या विनाज ते पापी मित्रने तजशे ॥४४॥ एम कहीने ते विदुर मौन रहेते छते, तथा राजाए विवाह करवा माटे वुद्धि-

स्नेहांचिता दृग्लहरी यदस्या--श्वरीकरीति प्रशमस्थितानाम् ॥ शैत्यं सुधाचंदनचंद्रमुख्यै । र्न जायते तत्किल तापभाजाम् ॥ ४३ ॥ विभर्ति चेयं नृपते स्वभावा--द्वैश्वानरेण प्रतिप-क्षभावम् ॥ इमां कुमारः परिणीय कन्या--मनोदितो हास्यति पापमित्रम् ॥ ४४॥ उक्त्वेति-संमुद्रितवाचि तत्र । दृष्टे मुखे बुध्धिनस्य राज्ञा ॥ वहिर्विवाहव्यवसायमस्य । प्रोक्तुमाह स्म निमित्तवेदी ॥ ४५ ॥ अलं तवानेन नृप श्रमेण । शक्तो विधौ न ह्ययमंतरंगे ॥ कन्यां स्वयं कर्मविलासनुन्न. । शुभाशयो दास्यति ते सुताय ॥ ४६ ॥ कार्यो विपादो न तदत्र राजन् । ग्राह्या किलैका भवितव्यतैव ॥ अर्थे ह्यशक्ये खलु यः प्रयासं । करोत्यसौ यास्यति हास्यभावम् ॥ ४७ ॥ गुप्तोऽपि पुण्याभ्युदयोऽस्य शश्व--द्वैश्वानरानर्थमपाकरोति ॥ मणि-र्यथा मुष्टिधृतस्तदेत- दवेहि खेदस्य च भेषजं ते ॥ ४८ ॥

धननु मुख जोते छते निमित्तिओ कहेवा लाग्यो के, ॥ ४५ ॥ हे राजन् ! तमारे ते प्रयासनी कइ जरुर नथी; केमके अतरग विधिमा ते शक्तिवान नथी; अने कर्मविलासथी प्रेराएलो ते शुभाशय पोतानी जाणेज तमारा पुत्रने कन्या आपशे ॥ ४६ ॥ माटे हे राजन् ! आ माटे खेद नहीं करवो, पण एक भवित-व्यतानेज ग्रहण करवी; केमके न बनी शके तेवा कार्यमां जे प्रयास करे छे, ते हास्यपात्र थाय छे ॥४७॥ गुप्त रहेलो एवो पण पुण्योदय मूठीमां रहेला मणिनी पेठे हमेशां आना वैश्वानर संबंधि अनर्थने दूर

करे छे; माटे तेने तारा खेदना औषधरूप जाणजे ? ॥ ४८ ॥एवी रीतनी निमित्तिआनी वाणीथी, दावानलथी दग्ध थएला तथा वरसादथी ठंडा थएला एवा पर्वतनी पेठे मारो पिता प्रथम खेदवालो तथा पाछलथी हर्षित थयो. ॥ ४९ ॥ हवे राजाए पण मने अत्यंत मोहथी अशक्य इलाजवालो जाणीने (विदुरने कह्युं के) तारे आ कुमारनी परीक्षा करवी, एम कहीने तेणे विदुरने मारी साथे जोड्यो. ॥ ॥ ५० ॥ हवे ते विदुर बीजे दिवसे मारी पासे आव्यो; त्यारे में तेने कह्युं के, गइ काले तुं केम नहीं आव्यो?

वाचेतिनैमित्तिकपुंगवस्य । पूर्वं विषण्णो मुदितश्च पश्चात् ॥ निर्वापितो वारिमुचा पिता मे । दावानलप्लुष्ट इवाद्रिरासीत् ॥ ४९ ॥ ज्ञात्वाथ मां नृपतिरप्यशक्य--प्रतिक्रियं दीप्तदुरंत मोहात् ॥ परीक्षितव्यो नवता कुमार--इतिप्रतीतौ विदुरं युयोज ॥ ५० ॥ दिने द्वितीयेऽथ स मामुपेतो । किं नागतोह्यस्त्वमितीरितश्च ॥ परीक्षितुं मां स्वविलंबहेतुं । जगौ श्रुतं दुर्जनसंगदोषम् ॥ ५१॥ उक्तं मया वर्णय तं ममापि । श्रवःसुधापारणमार्यवर्य ॥ इतीरितः स्पर्शनदुर्जनस्य । दोषप्रबंधं विदुरो बनाषे ॥ ५२ ॥ क्षितिप्रतिष्टे नगरेऽत्र कर्म--विलास-राजोऽस्ति महाप्रतापः ॥ उन्ने महिष्यौ पुनरस्य मुख्ये । एका शुनश्रीरशुनालिरन्या ॥५३॥ तदंगजौ द्वौ च मनीषिबालौ । जातौ कुमारौ प्रविलेसतुस्तौ ॥ दृष्टोऽन्यदा देहवनेऽथ ताभ्यां । कश्चित्पुमान् पाशकबद्धदेहः ॥ ५४ ॥

त्यारे मारी परीक्षा करवा माटे तेणे पोतानो नहीं आववानो हेतु कह्यो के, मने नहीं आववामां दुर्जनना संगनो दोष हेतुरूप छे. ॥ ५१ ॥ त्यारे में कह्युं के, हे आर्य विदुर ! कर्णोप्रते, अमृत सरखो एवो ते हेतु मने पण कहे ? एम कहेवाथी ते स्पर्शनरूपी दुर्जनना दोषोनुं वृत्तांत कहेवा लाग्यो. ॥ ५२ ॥ अहीं क्षितिप्रतिष्ट नामना नगरमां महाप्रतापी कर्मविलास नामे राजा छे; वली तेने एक शुभश्री अने बीजी अशुभालि एम बे मुख्य पटराणीओ छे. ॥ ५३ ॥ तेने मनीषी अने बाल नामे बे पुत्रो थया; तेओ एक

दहाडो देहरुपी वनमां क्रीडा करता हता, त्यां तेओए पाशथी बधाएला कोइक पुरुपने जोयो ॥५४॥ हवे बाले तेनो पाश छेदीने तेना दुःखनु कारण पूछयु; त्यारे तेणे महा मुश्केलीए कह्यु के, स्पर्शन छे नाम जेनुं एवो जे हु तेनो पेहेलो भवजतु नामे मित्र हतो ॥ ५५ ॥ ते भवजतु हमेशा चद्रप्रते जेम चकोर तेम माराप्रते स्नेही तथा अनुकुल हतो; हवे कोइक दिवसे मारु भाग्य मद होते छते तेने सदागमे ठग्यो ॥ ५६ ॥ अने त्यारथी ते मने मानतो नथी, अने सदागमनोज सग करे छे; तथा शरीर सबधि परिग्रहोना

छित्वाथ बालेन तदीयपाशं ।पृष्टः स वार्तामसुखस्य तस्य॥ कष्टाज्जगौ मे भवजंतुरासी--दाद्यः सुहृत् स्पर्शनसंज्ञकस्य ॥ ५५ ॥ अभून्मयि स्निग्धतरः सदासौ । चकोरकश्चंद्रइवानुकूलः ॥ प्रतारयामास सदागमस्तं । भाग्ये कदाचिन्मम मांद्यभाजि ॥ ५६ ॥ ततः प्रभृत्येप न मन्यते मां । सदागमस्यैव करोति संगम् ॥ विभर्ति शुद्धोऽंगपरीपहौघ--जयादिना मत्प्रतिकूलवृत्तिम् ॥ ५७ ॥ कृतव्यलीकेऽपि न तत्र मेऽभू--द्विपर्ययः स्नेहविजृंभितस्य ॥ मनागसावप्यनुयाति मां च । सदागमाऽसन्निहितः कदाचित् ॥ ५८ ॥ अथान्यदा तेन सदागमस्य । वचः पुरस्कृत्य कदर्थितोऽहम् ॥ यास्याम्यगम्यं भवतः पदं द्रा--गितीरयित्वा स जगाम मोक्षम् ॥ ५९ ॥ मित्रस्य तस्याहमसौ वियोगा- न्मर्तुं प्रवृत्तोऽस्म्यसुखात्यया य ॥ इतीरिते स्पर्शनपूरुषेण । बालोऽब्रवीत्तं प्रतिबंधहेतोः ॥ ६० ॥

समूहना जयादिकथी शुद्ध थइने मारी दुश्मनाइ करे छे ॥ ५७ ॥ एवी रीते दीधेल छे छेह जेणे एवा पण ते भवजतु प्रते स्नेहाल एवो जे हु, तेनी विपरीतता न थइ, वली कोइक वखते ज्यारे ते सदागमथी छेटो रहेतो त्यारे ते वली जरा मारा कहेवा प्रमाणे चालतो ॥ ५८ ॥ हवे एक दहाडो तेणे सदागमनु वचन अगाडी करीने मने कदर्थना करी, तथा कह्यु के, हु तने न मली शके एवा स्थानकप्रते हवे तुरत जाउ छु, एम कहीने ते मोक्षे गयो. ॥ ५९ ॥ ते मित्रना वियोगथी आ हुं दुःख मटाडवाने मरवा लाग्यो

छुं; एवी रीते ते स्पर्शन पुरुषें कहेवाथी बाल तेनी मित्राइ माटे कहेवा लाग्यो के, ॥ ६० ॥ हे स्पर्शन ! तुं खरेखर सज्जनोना उदाहरणरूप छो, अने ते भवजंतु दुर्जनोना उदाहरणरूप छे; तथा ते सदागम ठगोना उदाहरणरूप छे; माटे हुं तो हवे ताराप्रते अत्यंत स्नेही थयो छुं. ॥ ६१ ॥ पछी ते स्पर्शने पण ते बालनी मित्राइ कबूल राखी; हवे ते मनीषीए विचार्युं के, सुबुद्धि एवो सदागम सहज मित्रने तजवाने के तजाववाने यत्न करे नहीं ॥ ६२ ॥ माटे आ स्पर्शन खरेखर जूठाबोलो छे, अने आ बाले मूर्खो-

निदर्शनं त्वं किल सज्जनानां । स दुर्जनानां भवजंतुरेव ॥ प्रतारकाणां च सदागमोऽसा--विति त्वयि स्नेहपरोऽस्मि बाढम् ॥ ६१ ॥ तेनापि मैत्र्यं प्रतिपन्नमस्य । विचिंतयामास पुनर्मनीषी ॥ सदागमस्त्याजयितुं यतेत । हातुं न मित्रं सहजं सुधीश्च ॥ ६२ ॥ तत्स्पर्शनोऽयं ननु कूटभाषी । बालेन बालोचितमेव तेने ॥ ध्यात्वैवमेतेन दधौ स मैत्री--माभासमात्रान्न तु चित्तभावात् ॥ ६३ ॥ न्यगादि ताभ्यामिदमाशु पित्रो--र्वृत्तं पिता प्राह शुभं व्यधायि ॥ सदातनः स्पर्शननिर्मितेऽर्थे । तस्य स्वभावः प्रतिकूलवृत्तिः ॥ ६४ ॥ ततस्तदासंगपरं स बालं । क्षिपुःकुविद्यागहने जहर्ष ॥ तद्वर्जनोपायपरं परंतु । संयोजयिष्यन्गुणधोरणीभिः ॥ ६५ ॥ बालस्य माता तु तुतोष यस्मा--त्सा स्पर्शनाधीननिजेष्टसिद्धिः ॥ मनीषिमाता तु बभार खेदं । स्मृत्वाचिरं तद्दयितव्यलीकम्॥ ६६ ॥

चित कार्य कर्युं छे, एम विचारिने मनीषीए तेनी साथे उपर उपरथी मित्राइ करी, पण चित्तभावथी करी नहीं ॥ ६३ ॥ पछी तेओए आ वृत्तांत तुरत पोताना मात पिताने जणाव्युं, त्यारे पिताए कह्युं के, ठीक कर्युं, (तो पण) स्पर्शने करेला कार्यमां तेनी हमेशनी प्रतिकूल वृत्तिवालो स्वभाव हतो. ॥ ६४ ॥ पछी ते पिता, ते स्पर्शनना संगमां तत्पर थएला बालने कुविद्यारूपी वनमां फेंकतो थको, तथा तेना संगने तजवाना उपायमां तत्पर थएला एवा मनीषीने गुणोनी पंक्ति साथे जोडतो थको खुशी थवा लाग्यो.॥६५॥

हवे बालनी माता तो खुशी थइ; केमके, स्पर्शनने आधिन छे पोतानी इष्ट सिद्धि जेणीनी एवी ते हती; पण ते स्पर्शने घणा कालसुधि करेला नुकशानने याद करीने मनीषिनी माता खेद पामी ॥ ६६ ॥ पण मुखना अने नेत्रना विकारोथी ते स्पर्शन प्रते पोताना पुत्रना अरक्त भावने जाणीने मनमां ते धीरज पामी; तो पण विकल्पो बहु करवा लागी ॥ ६७ ॥ पछी बाल तो स्पर्शनमां रागी थयो, अने मनीषी हमेशा मनथी डरतो रह्यो, विश्वास विना सुख न थाय, एम विचारिने तेणे बोध नामना अंगरक्षकने

वालस्य माता तु तुतोष यस्मा–त्सा स्पर्शनाधीननिजेष्टसिद्धिः ॥ मनीषिमाता तु बभार खेदं । स्मृत्वा चिरं तद्विहितव्यलीकम् ॥ ६६ ॥ अरक्तभावं परमंगजस्या–नुमाय तस्मिन् धृतिमाप चित्ते ॥ मुखस्य नेत्रस्य तथा विकारैः । पुनर्विकल्पांश्च बहूंश्चकार ॥ ६७ ॥ बालस्ततः स्पर्शनबद्धरागो । हृदा सदास्ते चकितो मनीषी ॥ सुखं न विश्रंभविनाकृतं स्यादित्यंगरक्षं स जगाद बोधम् ॥ ६८ ॥ त्वयास्य कार्योऽनघ मूलशुद्धि । यथा भवेन्मे वितथोऽवभासः ॥ तेनाथ मुक्तः प्रणिधिः प्रभावो । भ्रांत्वा सदेशानवदत्समेतः ॥ ६९ ॥ बाह्येषु देशेषु मया प्रवृत्ति–र्नासा गतेनेतिगतोऽन्तरंगे ॥ देशे महापातकसद्म तत्र । दृष्टं पुरं राजसचित्तनाम ॥ ७० ॥ अश्रेयसा राजपथः पृथूनां । कल्याणमार्गाचलवज्रपातः ॥ लुंटाकचूडामणिरुग्रवीर्य–स्तत्रेक्षितो रागमृगेंद्रराजः ॥ ७१ ॥

कर्यु के, ॥ ६८ ॥ हे बोध ! तारे आ स्पर्शनना मूलनी शोध करवी, के जेथी मारो आभास सफल थाय; त्यारे ते बोधे पोताना प्रभाव नामना अनुचरने मोकल्यो, ते प्रभावे देशोमां भमी आवीने कह्यु के,॥ ६९॥ हुं बाह्य प्रदेशोमा गयो, त्यां तो मने तेनी तलास मली नहीं, तेथी हुं अंतरंग प्रदेशमां गयो; त्यां मे महापापोना घर सरखु राजसचित्त नामनुं नगर जोयु ॥ ७० ॥ त्यां मह्गेटां अकल्याणोना राजमार्ग सरखो, कल्याण मार्ग रूपी पर्वतने भेदवामां वज्रपात सरखो, लुटाराओमां चूडामणि सरखो तथा

भयंकर बलवालो राग नामनो राजा जोयो ॥ ७१ ॥ वली त्यां पोतानी इच्छित प्रवृत्तिमां परनी अपेक्षा नहीं राखनारो, जगतने वश करवामां समर्थ, पापोना प्रकाशमां चतुर तथा जयशील एवो ते राजानो विषयाभिलाष नामनो मंत्री जोयो. ॥ ७२ ॥ एटलामां ध्वनि करता मार्गने खेंचनारूं, मिथ्याभिमानादिकरूप रथोनी श्रेणिवालुं, गर्जना करता एवा ममत्वादिरूप हाथीओवालुं, दोडता एवा असंयमादि रूप उद्धत घोडाओनी श्रेणिवालुं, घणा मदथी उत्सुक थएली चपलतादिक रूप पायदल वालुं, कामदेवे करेल छे अगाडी प्रयाण जेमां एवुं, तथा विलास तथा हास्यादिकरूप नाना प्रकारना

परानपेक्षोऽभिमतप्रवृत्तौ । जगद्वशीकर्तुमलंभविष्णुः ॥ पापप्रकाशे पटुधीरमात्यो । दृष्टोऽस्य जिष्णुर्विषयाभिलाषः ॥ ७२ ॥ अत्रांतरे च ध्वनदध्वकर्षि । मिथ्याभिमानादिरथप्रथाढ्यम् ॥ गर्जन्ममत्वादिगजं प्रधाव--दसंयमाद्युद्धतवाजिराजि ॥ ७३ ॥ मदातिरेकोत्सुकचापलादि । पदातिकंदर्पकृताग्रयानम् ॥ विलासहासादिविचित्रतूर्य--कोलाहलं तन्मिलितं बलं द्राग् ॥ ७४ ॥ युग्मम् ॥ पृष्टोऽत्र हेतुं पुरुषो विपाको । निर्बंधबद्धो निजगाद मंत्री ॥ स्वमानुषाणि प्रजिघाय पंच । प्राक् स्पर्शनादीनि जगद्विजेतुम् ॥ ७५ ॥ काष्ठा परा साहसिकाग्रिमाणां । दुर्दांतवर्गस्य निदर्शनं च ॥ अवार्यधैर्याणि परं परीक्षा--स्थानं ध्रुवं तानि च वंचकानाम् ॥ ७६ ॥ जगज्जितप्रायममीभिरुच्चै--रत्रांतरे तानभिभूय चौरः ॥ संतोषनामा कतिचित्प्रसह्य । मुक्तौ नगर्यां मनुजाभिनाय ॥ ७७ ॥

वाजित्रोना कोलाहलवालुं ते लश्कर तुरत एकठुं थयुं. ॥ ७३ ॥ ७४ ॥ पछी त्यां मंदविपाक नामना पुरुषने आ लश्कर एकठुं थवानुं कारण पूछ्युं त्यारे तेणे कह्युं के, विषयाभिलाष मंत्रीए पेहेलां जगतने जीतवाने पोताना स्पर्शनादिक पांच माणसोने मोकल्यां. ॥ ७५ ॥ ते माणसो साहसिकना अग्रेसरीओनी पराकाष्टा सरखा छे, दुर्दांत वर्गना उदाहरण रूप छे, तथा अत्यंत धीरजवाला एवा तेओ ठगोनी परीक्षानां उत्कृष्ट स्थान रूप छे. ॥ ७६ ॥ तेओए प्रायें जगतने जीतेलुं छे, पण एटलामां

तेओने संतोष नामनो चोर हरावीने बलात्कारे केटलाक माणसोने मोक्षनगरमां लेइ गयो छे ॥ ७७ ॥ ते सांभलीने राजाए संतोषने जीतवा माटे परिवार सहित तैयारी करी छे; केमके, पायदलना तेजथी मनोहर थएला कया सुभटो पोतानो पराभव सहन करे ? ॥ ७८ ॥ हवे ते रागराजा पोताना पिता एवा महामोह राजाने चरणोने नमवा माटे गयो; त्यां तेणे अत्यंत लवायमान एवा रजस् अने तमस् रूपी बन्ने भ्रुकुटीओथी मनोहर थएला, सितास्मिता रूपी डाहाडी मूछोवाला, अज्ञानरूपी घडपणथी जीर्ण

श्रुत्वेति संतोषजयाय राजा । प्रगल्भतेऽसौ परिवारयुक्तः ॥पराभवं स्वस्य भटाः पदाते--स्तेजोऽभिरामा• कतमे सहंते ॥ ७८ ॥ नंतुं महामोहनृपस्य पाद--मूलं गतोऽसौ स्वपितुर्नृपोऽथ ॥ दृष्टः स तेनासमलंबमान--रजस्तमोभ्रूयुगलाभिरामः ॥ ७९ ॥ सितास्मितास्मश्रुधरः प्रकंप्रा--ऽविद्याजराजीर्णशरीरयष्टिः ॥ विशालतृष्णाभिधवेदिकाया । महाविपर्याससुविष्टरस्थः ॥ ८० ॥ युग्मम् ॥ पृष्टं शरीरे कुशलं नतेन । प्रोक्ता च तेन प्रकृतप्रवृत्तिः ॥ जगौ महामोहनृपोऽथ युक्तो । ममैव वृद्धस्य रणाभियोगः ॥ ८१ ॥ यशःप्रवाहेन रणे हि धीरा• । प्रक्षालिताऽशक्तिकलंकपंकाः ॥ दीप्तिं परां यांति धनुर्भृतस्त--त्प्रस्थानमस्थानसुखं ममेदम् ॥ ८२ ॥ इदं महामोहनृपोऽभिधाय । रागादियुक्तश्चलितो रणाय ॥ कोलाहलोऽयं तदिति प्रतीहि । गच्छाम्यहं चाग्रबले नियुक्तः ॥ ८३ ॥

थएला तथा कंपता शरीरवाला, तथा विशाल तृष्णारूपी वेदिकामां महाविपर्यास रूपी आसनपर बेठेला ते मोह राजाने जोयो ॥ ७९ ॥ ८० ॥ पछी तेणे नमीने तेना शरीरे सुखसाता पूछी; अने कार्यनो संबंध कह्यो; त्यारे मोह राजाए कह्यु के, मने वृद्धनेज रणसंग्राम करवो युक्त छे ॥ ८१ ॥ यशरूपी प्रवाहथी धोएल छे अशक्तिरूपी कलंकनो कादव जेओए एवा धनुषधारी सुभटो लडाइमां उत्कृष्ट तेजने पामे छे, माटे आ प्रस्थान मने अत्यंत सुखदाइ छे ॥८२॥एम कहीने मोह राजा रागादिक सहित लडाइ माटे

चाल्यो छे; तेनो आ तारे कोलाहल जाणवो; अने मने मोखराना लश्करमां जोड्यो छे, तेथी हुं जउं छुं. ॥८३॥एवी रीते त्यांथी स्पर्शनना मूलनी खबर लेइने हुं (प्रभाव) तमारी पासे आव्यो छउं; पण संतोषने सदागमना स्थानकमां रहेलो जाणीने हृदयमां हुं संशयवालो थयो छुं. ॥ ८४ ॥ ते सांभलीनेज बोध, प्रभाव सहित मनीषी पासे गयो; अने यथार्थ वृत्तांत कह्युं; तेथी ते आनंदित थयो. ॥ ८५ ॥ हवे एक दहाडो तेणे स्पर्शननेज पूछयुं के, तने सदागमेज बहु कष्ट आप्युं लागे छे; त्यारे तेणे कह्युं के, अत्यंत दुष्ट

लब्ध्वा ततः स्पर्शनमूलशुद्धिं । समागतोऽहं भवतः समीपम् ॥ संतोषमाकर्ण्य सदागमस्य । स्थाने तु वर्ते हृदि संशयालुः ॥ ८४ ॥ इदं निशम्यैव जगाम बोधः । सह प्रभावेण मनीषि-पार्श्वे ॥ वृत्तांतमाचष्ट यथोपनीतं । तुष्टिं च पुष्टिं च ययौ ततोऽसौ ॥ ८५ ॥ पृष्टोऽन्यदा स्पर्शनएव तेन । सदागमेनैव कदर्थितस्त्वम् ॥ स प्राह वाचैव स मेऽपकारी । व्यापार्यसंतोषमतीवदुष्टम् ॥ ८६ ॥ अथास्तशंको विषयाभिलाष-भृत्यं जगद्वंचनसावधानम् ॥ जानन्नसौ स्पर्शनमन्वतिष्ठत् । स्वार्थाय विश्रंभमनेन बाह्यम् ॥ ८७ ॥ अथान्यदा देहमनुप्रविश्य । बालस्य बाढं निजयोगशक्त्या ॥ स स्पर्शनोऽवाच्यरसानुविद्धां । वांछां मृदुस्पर्शगतां वितेने ॥ ८८ ॥ मनीषिणस्त्वेष तथा न चक्रे । स्वभावभेदाकलनाद्विकारम् ॥ दाहावहो भस्मकवज्जनानां । लौल्यं हि दोषो न धृतिस्तु भोगे॥८९॥ प्रदर्शिता द्यौर्भवता ममेति । बालस्य वाचा स दधौ प्रमोदम् ॥ मनीषिणस्त्वस्वरसां निशम्य । हीणस्तदानीमुपचारवाचम् ॥ ९० ॥

एवा संतोषने अगाडी करीने ते वचनथीज मारो अपकार करनारो छे. ॥ ८६ ॥ हवे निःशंक थइने ते मनीषी विषयाभिलाषना चाकर स्पर्शनने जगतने ठगवामां सावधान थएलो जाणीने स्वार्थ माटे बाह्यथी तेनी साथे विश्वासी थयो. ॥ ८७ ॥ हवे एक दहाडो पोतानी योग शक्तिथी ते स्पर्शन बालना शरीरमां प्रवेश करीने अवाच्य रसवाली कोमल स्पर्शनी इच्छा विस्तारवा लाग्यो.॥ ८८ ॥पण स्वभावना भेदथी ते मनीषिने तेवो विकार करी शक्यो नहीं. ॥ ८९ ॥ "तें तो मने स्वर्ग देखाड्यो" एवी रीतनी बालनी

वाणीथी ते स्पर्शन हर्ष पाम्यो; अने मनीषिनी पोताने रस न उपजे एवी वाणी सांभलीने ते लज्जा युक्त थयो ॥ ९० ॥ स्पर्शननी योगशक्तिना प्रभावने सांभलीने वालनी माता खुशी थइ अने मनीषिनी माता खेद पामी; तो पण तेनुं मध्यस्थपणु जोइने तेणीए घणो शोक कर्यो नहीं ॥ ९१ ॥ हवे ते सांभलीने कर्मविलास राजा वालप्रते कुपित थयो, अने मनीषिप्रते तुष्टमान थयो; हवे वाले हमेशां स्पर्शनमां रागी थइने कुललज्जा छोडी ॥ ९२ ॥ स्त्रीओमां लोलुपी थइने ते गम्यागम्यने न जाणवा लाग्यो, तेम अनीतिथी डरतो नथी, गुरुना उपदेशनी अपेक्षा राखतो नथी, तथा निःशंक

निशम्य वालस्य तुतोष माता । विजृंभितं स्पर्शनयोगशक्तेः ॥ मनीषिणः खेदमियाय किंतु । माध्यस्थ्यमालक्ष्य शुशोच नोच्चैः ॥ ए१ ॥ श्रुत्वाथ वाले कुपितः परस्मि-स्तुष्टश्च तत्कर्मविलासराजः ॥ जहाति वालोऽथ कुलस्य लज्जां । दिवानिशं स्पर्शनवद्धरागः ॥ ए२ ॥ गम्यामगम्यां च न वेत्ति कांचि- न्नारीषु गृध्रो न बिभेत्यनीतेः ॥ नापेक्षते चैष गुरूपदेशं । स्वहास्यतां नाकलयत्यशंकः ॥ ए३ ॥ निवारयिष्यन्नहितप्रसंगं । कृपापरः स्पर्शनमूलशुद्धिम् जगौ मनीषी पुरतोऽस्य तत्तु । गतं लुठित्वा किल पार्श्व एव ॥ ए४ ॥ दृष्टार्थरागी करभो न वेत्ति । रसं ह्यदृष्टार्थकथासितायाः ॥ वालेरणायासमितिप्रहाय । तूष्णींस्थितः स्वार्थपरो मनीषी ॥ ए५ ॥ अथागतः कर्मविलासराज–सामान्यरूपा तनयोऽन्यदेशात् ॥ तं स्पर्शनस्तौ च समालिलिंगु–र्वालेरितः स्पर्शनमेष भेजे ॥ ए६ ॥

थइने (थती एवी) पोतानी हांसीने पण जाणतो नथी ॥ ९३ ॥ हवे दयालु मनीषी अहितनो प्रसंग निवारतो थको वालनी आगल स्पर्शनना मूलनी खबर कहेवा लाग्यो, पण तेनु ते वचन तेने कंइ असर करी शक्यु नहीं ॥ ९४ ॥दीठेली वस्तुनाज रागवालो उंट, नहीं दीठेल छे कथा पण जेनी एवा साकरना रसने जाणतो नथी, एम जाणीने वालने समजाववाना प्रयासने तजीने मनीषी स्वार्थमां तत्पर थयो थको मौन रह्यो ॥ ९५ ॥ हवे कर्मविलास राजानी सामान्यरूपा नामनी राणीनो पुत्र

देशांतरथी आव्यो, तेने स्पर्शने अने ते बाल तथा मनीषीए आलिंगन कर्युं, पछी बालनी प्रेरणाथी ते पण स्पर्शनने भजवा लाग्यो॥९६॥ते स्पर्शने पण तेना चित्तने विस्मय पमाड्युं अने मनीषि तेनो दोष कहेवा लाग्यो, त्यारे फलना अनुभव विना ते बन्नेना वचनमां संशयवालो थयो ॥९७॥हवे तत्वने जाणवानी इच्छाथी तेणे विवेचन पूर्वक माताने पूछ्युं; त्यारे तेणीए कह्युं के, तारे बन्नेना उपरोधथी विरोध राख्या विना अवसरे बलवान पक्ष ग्रहण करवो.॥९८॥जुदा जुदा बे कार्योमां संशयवालो एवो जे माणस

तेनापि विस्मापितमस्य चेतो । जगौ मनीषी पुनरस्य दोषम् ॥ फलानुभूतेरविशंक्यन्नावाद्--द्वयोः स वाक्येऽजनि संशयालुः ॥ ९७ ॥ अंबां स पप्रच्छ विशिष्य तत्वं । जिज्ञासमानोऽथ जगाद साऽपि ॥ द्वयानुरोधादविरोधन्नाजा । ग्राह्यस्त्वयेऽद्धेऽवसरे हि पक्षः ॥ ९८ ॥ अर्थद्वये न्नेदिनि संशयालुः । कुर्वीत यः कालविलंबपक्षम् ॥ मनोरथः सिद्ध्यति तस्य नूनं सिद्धो यथोच्चैर्मिथुनद्वयस्य ॥ ९९ ॥ ऋजोर्नृपस्य प्रगुणाख्यदेव्याः । पुत्रोऽस्ति मुग्धः स्मरतुल्यरूपः ॥ तस्यास्ति न्नार्याऽकुटिलान्निधाना । पुलोमपुत्रीरतिरूपजैत्री ॥ १०० ॥ मुग्धोऽन्यदा नूतनचूतवल्ली--विलासरम्ये विपिनं वसंते ॥ गतः सन्नार्यः कुसुमोच्चयाय । प्राक्सूर्यपूर्त्यागमनं नियम्य ॥ १०१ ॥ इतश्च कालज्ञविचक्षणाख्यं । तत्रागतं व्यंतरयुग्ममाशु ॥ कालज्ञचेतोऽकुटिलां निरीक्ष्य । क्षुब्धं तदासीद्धृतकामफेनम् ॥ १०२ ॥

कालविलंबनो पक्ष करे छे, तेनो मनोरथ, जेम बे मिथुननो सिद्ध थयो छे, तेम सिद्ध थाय छे. ॥ ९९ ॥ ऋजु नामना राजानी प्रगुणा नामनी राणीनो कामदेव सरखो रूपालो मुग्ध नामे पुत्र छे, तेने इंद्राणी तथा रतिना रूपनें जीतनारी अकुटिला नामें स्त्री छे. ॥ १०० ॥ हवे एक दहाडो नवा आंबानी वेलडीना विलासथी मनोहर एवी वसंत ऋतु आवते छते मुग्ध पुष्पो वीणवा माटे स्त्री सहित सूर्यास्त पेहेलां आववानो नियम करीनें वनमां गयो. ॥ १०१ ॥ हवे एटलामां त्यां कालज्ञ अने विचक्षणा नामनुं

व्यतरनु जोडुं तुरत आव्युं, तथा अकुटिलाने जोइने कालज्ञनुं चित्त कामातुर थइ क्षोभ पाम्यु ॥ १०२ ॥ वली विचक्षणानु मन पण मुग्धना रूपरूपी कुवामां डेडकानी पेठे बुडयु; पछी बन्नेने ठगवामां तत्पर एवा तेओ बन्नेए वेश बदलीने आनद भोगव्यो ॥ १०३ हवे घेर आवेलां एवां ते बन्ने जोडलां स्नेहरूपी समुद्रमते चद्रोदयनी पेठे शोभवा लाग्यां, आ कृपा वनदेवतानी छे, एम जाणीने ऋजु राजा खुशी थयो ॥ १०४ ॥ सर्व प्रगुणादिवर्ग तथा क्रीडा छे प्रिय जेने एवो कालज्ञ पण हर्ष पाम्यो, तथा स्त्रीनुं दुष्ट आ-

विचक्षणाया अपि मुग्धरूपे । कुपे मनो दर्दुरवन्निमग्नम् ॥ द्वाभ्यां द्वयोर्वंचनतत्पराभ्यां । रूपं परावृत्य मुदोऽनुभूताः ॥ १०३॥ गृहागतं तन्मिथुनद्वयं च । स्नेहाब्धिबिंबोदयवद्दिदीपे॥ अयं प्रसादो वनदेवताया । इतिप्रतीत्यर्जुरवाप तोषम् ॥ १०४ ॥ सर्वोऽपि हर्षं प्रगुणादिवर्गः । केलिप्रियः कालविदप्यवाप ॥ विचिंत्य नार्याचरणं विरूपं । तां हंतुमैहत्स च दुष्टशीलाम् ॥ १०५ ॥पुनः स दध्यौ ननु तुल्यशीला--वावां हतायां च मयांगनायाम् ॥ रक्ता नृशंसेऽकुटिला मयि स्या--न्नेत्याश्रितः कालविलंबपक्षम् ॥ १०६ ॥ विचक्षणाप्येवमवेत्य तस्था--वुभौ मनुष्याचरणे प्रवृत्तौ ॥ अथान्यदा मोहलयाभिधाने । सूरिर्वने बोधरतिः समेतः ॥ १०७ ॥ राजा गतस्तत्पदवंदनार्थं । श्रोतुं निविष्टो वचनामृतं च ॥ कालज्ञमुख्या अपि तं प्रणम्यातुष्टा यथास्थानमथोपविष्टाः ॥ १०८ ॥

चरण चिंतवीने ते दुःशीलाने हणवाने ते इच्छवा लाग्यो ॥ १०५ ॥ वली तेणे विचार्यु के, अमो बन्ने खरेखर तुल्यशीलवाला छीए; अने माराथी आ स्त्री हणाते छते, घातकी एवा हु प्रते अकुटिला आसक्त थशे नहीं; एम विचारिने तेणे कालना विलबपक्षने स्वीकार्यो ॥ १०६ ॥ विचक्षणा पण एम जाणीने रही; अने बन्ने मनुष्याचरणमां प्रवृत्त थया; हवे एक दहाडो मोहलय नामना वनमां बोधरति नामे आचार्य पधार्या ॥ १०७ ॥ ऋजु राजा तेमना चरणोने वांदवा माटे गयो; तथा वचनामृत सांभलवाने

बेठो; तेम कालज्ञादिको पण तेमने नमीनें खुशी थया थका योग्य स्थानके बेठा. ॥ १०८ ॥ गुरुए कहेला विषयसुखमां अत्यंत दूषणने अने तेना त्यागमां अत्यंत सुखने सांभलीने; निबिड मोहजाल त्रुटवाथी व्यंतरनुं जोडलुं सम्यक्त्व पाम्युं. ॥ १०९ ॥ हवे तुरत तेमना शरीरमांथी निकलेला श्याम अने लाल परमाणुओना समुहथी बनेली धुंवाडाथी मलीन थएली अग्निनी शिखा सरखी कोइक स्त्री पराङ्मुख थइ थकी दूर जइ उभी. ॥ ११० ॥ हवे कालज्ञ तथा विचक्षणाए खेद पामीनें गुरुने पूछयुं के, हे भगवन् !

दुरंतदोषं विषयानुषंगे । त्यागे च सौख्यातिशयं गुरूक्तम् ॥ श्रुत्वा विलीने घनमोहजाले । सद्दर्शनं व्यंतरयुग्ममाप ॥ १०९ ॥ विनिर्गतैर्द्रागथ तद्वपुर्भ्यां । श्यामैश्च रक्तैर्घटिताणुपुंजैः ॥ दूरे स्थिता कापि पराङ्मुखी स्त्री । ज्वालेव धूमैर्मलिना कृशानोः ॥ ११० ॥ विषद्य कालज्ञ विचक्षणाभ्यां । दुःशीलभावानुशयोज्झताशु ॥ शुद्धिः कथं नौ भवितेतिपृष्टः । प्रकृष्टयोगो भगवानुवाच ॥ १११ ॥ अयं हि भद्रौ युवयोर्नदोषः । स्वरूपतो निर्मलयोः सदैव ॥ अस्याः परं दूरमवस्थिताया । नार्या अनार्याचरणे रतायाः ॥ ११२ ॥ पृष्टोऽथ ताभ्यां भगवन्नियं का । दुष्टाथ स प्राह महानुभावः ॥ प्रवर्तिका दोषगणस्य धर्म--निवर्तिकेयं ननु भोगतृष्णा ॥ ११३ ॥ करालकालानलकालमेध--संमुर्छितेव प्रलयस्य वृत्तिः ॥ रजस्तमोभ्यामवगुंठितेयं। भयाय केषां न विवेकभाजाम् ॥ ११४ ॥

अमारा दुःशीलपणाना पश्चातापथी मले एवी अमारी शुद्धि शीरीते थशे ? त्यारे महान योगवाला एवा बोधरति महाराजे कह्युं के, ॥ १११ ॥ हे भद्र ! हमेशां स्वभावथी निर्मल एवा जे तमो, तेओनो आ दोष नथी; पण दुष्टाचरणमां रक्त थएली तथा दूर उभेली एवी आ स्त्रीनो ते दोष छे. ॥ ११२ ॥ त्यारे तेओए पूछयुं के, हे भगवन् ! ते आ दुष्ट स्त्री कोण छे ? त्यारे महा प्रभाविक एवा ते गुरुए कह्युं के, दोषोना समूहने प्रवर्तावनारी, तथा धर्मने निवर्तावनारी खरेखर आ भोगतृष्णा छे. ॥ ११३ ॥ रजस् अने तमस्थी

आच्छादित थएली एवी आ भोगतृष्णा, भयकर एवा कल्पांत कालना अग्नि अने मेघथी मूर्छित थएली प्रलयनी वृत्तिनी पेठे क्या विवेकीयोना भय माटे नथी थती ?॥११४॥त्यारे तेओए कह्यु के दुष्ट शक्तिवाली एवी आ भोगतृष्णाथी अमारी मुक्ति केम थाय ? त्यारे ज्ञानीए कह्यु के, ते मुक्ति अन्य भवमां थशे; पण मोहना उछालाथी आ भवमां नहीं थाय ॥११५॥पण आ तृष्णानो नाश करवा माटे तमोए बलवान वज्र सरखुं सम्यक्त्व मेलव्यु छे; माटे ते सम्यक्त्वने तमारे वारवार दीपाववु, के जेथी तमारी भोगतृष्णा

तावाहतुर्मुक्तिरनिष्टशक्ते–रस्याः सकाशात्कथमावयोः स्यात् ॥ ज्ञानी जगावन्यभवे भवित्री । मोहोल्बणत्वान्न पुनर्भवेऽस्मिन् ॥ ११५ ॥ अस्याः परं निर्दलनाय वज्रं । सम्यक्त्व मात्तं सुदृढं भवद्भ्याम् ॥ उद्दीपनीयं मुहुरेतदेवं । तनूभवित्री खलु भोगतृष्णा ॥ ११६ ॥ श्रुत्वैतदाश्वासमुपागतौ ता–वथ स्वदुष्टाचरणानुतापात् ॥ ऋजुर्महीशः प्रगुणा च देवी । यांतिस्म मुग्धोऽकुटिला च खेदम् ॥ ११७ ॥ अथो चतुर्णामपि विग्रहेभ्यो । विनिर्गतं पांडुरडिंभरूपम् ॥ यूयं मयोच्चैः परिरक्षितानि । भयं नयुष्माकमितिब्रुवाणम् ॥ ११८ ॥ पश्चात्ततोऽन्यन्निरियाय कृष्ण–मन्यत्ततः कृष्णतरं विरूपम् ॥ प्रवर्धमानं च निवार्य दध्रे । शुक्लेन तद्धस्ततलप्रहारात् ॥ ११९ ॥ तदाह सिद्धांतरहस्यवेदी । न तत्वशुद्धेषु भवत्सु दोषः ॥ किंतु द्वितीयं खलु डिंभरूपं । निबंधनं दूषणसंततीनाम् ॥ १२० ॥

दुःखी थशे ॥ ११६ ॥ ते सांभलीने हवे तेओ बन्ने पोताना दुराचारना पश्चातापथी शांत थया, तथा ऋजु राजा, प्रगुणा राणी, मुग्ध तथा अकुटिला खेद पाम्यां ॥ ११७ ॥ तमारुं मे उंचे प्रकारे रक्षण कर्युं छे, अने तमोने बीक नथी, एम कहेतु एवु श्वेत बालकनु रूप हवे ते चारेना शरीरमांथी निकल्यु ॥ ११८ ॥ पछी तेमांथी बीजु कालु रूप निकल्युं, तथा तेमांथी त्रीजुं वधारे कालु विरूप नीकल्यु; तथा वृद्धि पामता एवा तेने निवारीने श्वेत रूपे हस्त प्रहारथी पकडी लीधु ॥ ११९ ॥ त्यारे सिद्धांतोनां

वेठ्येते जाणनारा गुरुमहाराजे कह्युं के तत्वथी शुद्ध एवा जे तमो, तेमां दोष नथी, पण जे बीजुं बालकनुं रूप निकल्युं, ते दूषणोनां समूहनुं कारण छे. ॥ १२० ॥ ते घणां कष्टरूप तथा मोहना परिवारने प्रवर्तावनारुं " अज्ञान " छे, अने ते मूलरूप अज्ञानविना भोगतृष्णा पण अत्यंत दुष्ट प्रवृत्तिने विस्तारती नथी. ॥ १२१ ॥ ते अज्ञान अपार संसाररूपी समुद्रमां पडता माणसोने गलामां (बांधेली) शीला सरखुं, तथा साक्षात् नरककुंड सरखुं, अने मोक्षमार्गमां अंध-

अज्ञानमेतद् घनकष्टरूपं । प्रवर्तकं मोहपरिच्छदस्य ॥ न भोगतृष्णापि तनोतिमूला–ऽज्ञानं-विना दुष्टतरां प्रवृत्तिम् ॥ १२१ ॥ अपारसंसारसमुद्रमध्ये । गले शिलेयं पततां जननाम् ॥ इदं हि साक्षान्नरकस्य कुंडं । अन्नः शिवाध्वन्ययमंधकूपः ॥ १२२ ॥ इतश्च यत्कृष्णतरं द्वितीयं । विनिर्गतं तत्खलु पापनाम ॥ संसारचक्रे वसतां जनानां । संक्लेशजालस्य तदेव मूलम् ॥ १२३ ॥ शुक्लेन डिंभेन निवारितं तत् । प्रवर्धमानं पुनरार्जवेन ॥ इदं हि शुद्धाशय-हेतुभूतं । पापानुबंधं नियमान्निहंति ॥ १२४ ॥ ब्रूते यदेतत्परिरक्षितानि । मयैव यूयं तदतः प्रमाणम् ॥ अज्ञानजं पापमपोह्य यस्मा–न्मार्गानुसारित्वमिदं विधत्ते ॥ १२५ ॥ अनार्जवं दुःकृतजन्मभूमि–रजन्मभूमिस्तु विपर्ययोऽस्य ॥ अनार्जवं संयमधूमकेतु–र्विशुद्धिहेतुर्ध्रुव-मार्जवं तु ॥ १२६ ॥

कुवा सरखुं छे. ॥ १२२ ॥ पछी ते बीजुं वधारे कालुंरूप निकल्युं तेनुं नाम " पाप " छे; अने तेज पाप संसाररूपी चक्रमां वसता माणसोने क्लेशोना समूहनुं मूल छे.॥१२३॥वली ते वधतां पापने श्वेत बालकरूप आर्जवे निवार्युं छे; माटे ते आर्जव शुद्ध आशयनो हेतु छे, अने ते निश्चयें करीने पापना अनुबंधने हणे छे. ॥ १२४ ॥ वली ते जे एम कहे छे के, मेंज तमारुं रक्षण कर्युं छे, ते खरुं छे; केमके, ते अज्ञानथी उत्पन्न थएला पापनो नाश करीने मार्गानुसारिपणुं करे छे. ॥ १२५ ॥ अनार्जवता पापोनुं जन्मस्थानक

छे, तथा आर्जवता पापोनु जन्मस्थानक नथी, तेम अनार्जवता संयम प्रते धूमकेतु सरखी छे, अने आर्ज-
वता विशुद्धिनो हेतु छे ॥ १२६ ॥ शु अहीं माणसोए भोगोरूपी दावानलथी मलेला दाहोथी, के
करेला एवा ज्ञानरूपी अमृतमां अवगाहनथी रहेवुं? माटे हे सरलस्वभावीओ! तमोने जे हितकारी
होय, तेने तमो वधारे सेवो? ॥ १२७ ॥ परिणामे तापना संस्कार वाला दुःखोथी गहन एवा आ संसा-
रमा उत्तमोने आस्था शा माटे राखवी जोइए? केमके, मूलमाथी उखेडेल छे दुःखरूपी वेली जेणे एवो
सुखी माणस साधुविना कोण होय छे? ॥ १२८ ॥ आ सांभलीने ऋजु आदिक प्रतिबोध पाम्या, अने

किं भोगदावानललब्धदाहैः । किंवाकृतज्ञानसुधावगाहैः ॥ भाव्यं मनुष्यैरिह यद्धितं वो ।
भृशं भजध्वं तदृजुस्वभावाः ॥ १२७ ॥ आस्था सतां का परिणामताप–संस्कारदुःखैर्गहने
ऽत्र लोके ॥ समूलमुन्मूलितदुःखवल्लिः । सदा सुखी साधुजनविना कः ॥ १२८ ॥ इदं निश-
म्यर्जुमुखाः प्रबुद्धा । ययाचिरे चारुदिनं व्रताय ॥ तदेव चादर्शि मुनीश्वरेण । तत्रैव दीक्षां
जगृहुस्तदाते ॥ १२९ ॥ तेभ्यः प्रणष्टे शितिभिन्नरूपे । शुक्लं पुनस्तत्तनुषु प्रविष्टम् ॥ तद्धन्य-
ता मात्मविपर्ययं च । दध्यौ तदा व्यंतरयुग्ममंतः ॥ १३० ॥ गुरून् मुनींश्च प्रणिपत्य तुष्टौ ।
सम्यक्त्वमात्रादथ दंपती तौ ॥ स्थानं गतौ स्वं वपुषोः प्रविष्टा । तयोस्तदानीं खलु भोग-
तृष्णा ॥ १३१ ॥

दीक्षा माटे सारा दिवसनी पृछा करी, त्यारे मुनिराजे पण तेज दिवस देखाड्यो त्यारे तेओए पण तेज
वखते त्यां दीक्षा लीधी ॥ १२९ ॥ हवे तेओमाथी कालां बालकनु रूप नाशी गये छते, वली तेओना
शरीरोमा श्वेतरूप पेठुं; त्यारे व्यंतरयुग्म मनमां तेओनी धन्यता तथा पोतानी विपरीतता विचा-
रवा लाग्यु ॥ १३० ॥ हवे ते बन्ने स्त्रीभरतार सम्यक्त्व मात्रथी संतुष्ट थइने गुरुने तथा मुनिओने
नमीने पोताने स्थानके गया, ते वखते तेओना शरीरमां भोगतृष्णा दाखल थइ ॥ १३१ ॥

करेलुं छे औषध जेनुं, तथा पथ्य भोजन खानारा एवा माणसना शरीरमां पूर्वे थएली एवी पण जेम व्याधि, तेम सम्यक्त्वथी शुद्ध थएलां एवां तेओना मनमां ते भोगतृष्णा दोषोनी वृद्धि करनारी न थइ. ॥ १३२ ॥ हवे एक दहाडो तेओ बन्ने पूर्वना दुश्चिंतितमां कालविलंबना पक्षने धारण करता थका गुप्त रह्या, तथा अंदर अंदरना अभिलाषथी पोताना नामोना चरितार्थ भावने जाणवा लाग्या. ॥ १३३ ॥ हवे सामान्यरूपाए मध्यम बुद्धिने कह्युं के, हे पुत्र ! माटे एकार्थनी सिद्धि माटे संदेहवाला बन्ने पक्ष होते

परं न सा दोषविवृद्धयेऽभूत्तच्चेतसोर्दर्शनशुद्धिभाजोः ॥ पूर्वप्रवृत्तापि कृतौषधस्य।रुजेव पथ्या-न्नभुजः शरीरे ॥ १३२ ॥ अथान्यदा तौ रहसि स्थितौ प्राग् । दुश्चिंतिते कालविलंबपक्षम् ॥ संमानयंतौ स्म मिथोऽभिलापा–द्वित्तः स्वनाम्नोश्चरितार्थभावम् ॥ १३३ ॥ सामान्यरूपाऽह तदंगजाऽसौ । संदिग्धपक्षद्वितये विलंबः ॥ एकार्थसिद्धिंप्रति पर्यवस्य–स्तयोरिव स्ताद्भवतो हिताय ॥ १३४ ॥ वचांसि बालस्य मनीषिणश्चां–तरांतराऽसावनुवर्तमानः ॥ प्रमाणयन् मातृवचो बभार ।क्षोभस्वभावस्थितिसिंधुसाम्यम् ॥१३५॥ माताथ बालस्य तनौ प्रविष्टा। स्वयोगशक्त्या सुखकारणाय ॥ स्फुटत्रिदोषः स निसर्गदुष्टो । बभूव दुष्टद्वयसंक्रमेण॥१३६॥ असौ ततः कामयते कुविंद–मातंगनारीरपि मुक्तलज्जः ॥ उपेक्षमाणेन जनापवादं । त्यक्तं न तेनात्र किमप्यकृत्यम् ॥ १३७ ॥

छते विलंब करवो; अने ते विलंब ते बन्ने युग्मोनी पेठे तारा हित माटे थाओ ? ॥ १३४ ॥ हवे ते मध्यम बुद्धि वच्चे वच्चे बालना अने मनीषिना वचनने अनुसरतो थको तथा माताना वचनने सत्य गणतो थको क्षोभ अने स्थिरतावाला समुद्रनी तुलना करवा लाग्यो. ॥ १३५ ॥ हवे बालनी माता पोतानी योगशक्तिथी तेने सुख करवा माटे तेना शरीरमां पेठी, तेथी ते बन्ने दुष्टना संक्रमथी स्वभावथी दुष्ट एवो ते बाल प्रगट रीते त्रिदोषवालो (सन्निपातवालो) थयो. ॥ १३६ ॥ पछी ते बाल लज्जाने तजीने

वणकर तथा चांडालनी स्त्रीओने पण इच्छवा लाग्यो,तथा लोकापवादनी उपेक्षा करीने तेणे कई पण अकार्य तज्यु नहीं ॥१३७॥धीक अने अपवादथी मनिषीएं करीने निवारण कराता एवा स्नेहाल मध्यम बुद्धिने ते बाल ठगाएलो जाणे छे, अने पोताने आवी सामग्रीवालो जोइने हृदयमां पण मातो नथी;(अर्थात् फुलाइ जाय छे) ॥१३८॥तेथी मध्यम बुद्धिए जाण्युं के, आ बालप्रते उपदेश शक्ति लागु पडती नथी, केमके,करेल छे अङ्कुराओ-थी शोभित कृष्णभूमि जेणे एवो पण वरसाद पत्थर तलपर शु करी शके?॥१३९॥केसुडांओ रूपी मांस-पेशीरूप बलिने गृहण करतो, तथा विखेरेल छे पुष्पोनी श्रेणिरूप रज जेणे, प्रजाने उन्माद करनारो,तथा को-

निवारयंतं च ह्नियापवादा—न्मनीषिणा वेत्ति स मध्यबुद्धिम्॥प्रतारितं स्नेहपरं परं स्वं ।साम-ग्र्यमुद्वीक्ष्य न माति चित्ते ॥ १३७ ॥ ज्ञातं ततो मध्यमबुद्धिनापि । न क्रामतेऽस्मिन्नुपदेश-शक्तिः ॥ कृतप्ररोहांचितकृष्णभूमिः । शिलातले किं कुरुतेऽबुवृष्टिः ॥ १३९ ॥ गृह्णन् बलिं किंशुकमांसपेशीं । विकीर्णपुष्पालिरजाः प्रजानाम्॥उन्मादको भूत इवोपतस्थे ।ऽन्यदा वसंतः पिकगीतमत्तः ॥ १४० ॥ बालस्तदा स्पर्शनमातृयुक्तः । क्रीडापरो मध्यधियान्वितः सन् ॥ लीलाधरं नाम वनं जगाम । ददर्श तत्र स्मरचैत्यमुच्चैः ॥ १४१ ॥ त्रयोदशीनाम्नि दिनेऽर्थिलोके । महामहे तत्र विधीयमाने ॥ कुतुहली तत्र गतः स चैत्ये । ददर्श गुप्तं स्मरवा-सहर्म्यम् ॥ १४२ ॥ द्वारेऽथ संस्थाप्य वयस्यमेको । मध्ये प्रविष्टः सहसैव बालः ॥ पस्पर्श तत्राब्जमृणालमृद्वीं । प्रसुप्तकंदर्परतिं स शय्याम् ॥ १४३ ॥

यलोना गीतथी मदोन्मत्त थएलो एवो भूत सरखो वसत ऋतुनो समय एक दहाडो आव्यो, ॥१४०॥ते वखते क्रीडामा तत्पर एवो बाल, स्पर्शन, पोतानी माता, तथा मध्यमबुद्धि सहित लीलाधर नामना वनमां गयो, त्यां तेणे कामदेवनु मंदिर जोयु ॥ १४१ ॥ हवे त्यां तेरस नामना दिवसे अर्थी लोको मोटो उत्सव करते छते ते कौतुकी बाल ते मंदिरमां गयो, त्यां तेणे कामदेवना गुप्त आवासने जोयो ॥ १४२ ॥ हवे पोते मित्रने बारणे बेसाडीने तुरत अंदर गयो; तथा त्यां कमलनाल सरखी कोमल, अने सुतेल छे

कलाग्रहणकालेऽथ । कलाचार्य विधानतः ॥ संपूज्य पित्रा तस्याहं । प्रथितोत्सवमार्पितः ॥ ३७ ॥ उक्तश्चाहं त्वया पुत्र । समाराध्योऽयमादरात् ॥ विद्यार्थिना कलाचार्यः । प्रणिपात विधायिना ॥ ३८ ॥ मयोक्तं किं विजानीते । वराकोऽयं ममाग्रत.॥ तवाऽनुरोधाद् गृह्णामि । कलाः कुर्वे नतिं पुनः ॥ ३९ ॥ रहःस्थितं ततस्तातः । कलाचार्यमभाषत ॥ नोद्वेगोऽस्य त्वया कार्यो । ऽविनयं प्रेक्ष्य मानिनः ॥ ४० ॥ तद्वचोऽसौ प्रतिश्रुत्य । दध्यौ बाल्यविजृंभितम् ॥ मानोऽस्य शास्त्रबोधेऽयं । स्वयं नम्रो भविष्यति ॥ ४१ ॥ ततोऽसौ सर्वयत्नेन । प्रवृत्तो मम पाठने ॥ पठंति तत्र चान्येऽपि । विनीता राजदारकाः ॥ ४२ ॥ शैलराजः प्रवृद्धोऽभू दादरेण च मे गुरोः ॥ ततो जात्यादिनाचार्यं । हीलयामि प्रतिक्षणम् ॥ ४३ ॥ दध्यौ तदा कलाचार्यो । नाऽस्य शास्त्रश्रमाक्षणः ॥ यथाम्लभोजनात् क्षीण—तनोः श्वयथुवर्धनात्॥४४॥

चेष्टा छे, पण ज्यारे शास्त्रोनो तेने बोध थशे, त्यारे तेनुं आ मान पोतानी मेलेज नम्र थइ जशे ॥ ४१ ॥ पछी ते कलाचार्य मने सर्व प्रयतपूर्वक भणाववा लाग्यो, वली त्यां बीजा पण विनयी राजकुमारो भणता हता ॥ ४२ ॥ हवे गुरु तरफना आदरथी मारो शैलराज (अहंकार) वधवा लाग्यो; अने तेथी दरेक क्षणे हु जाति आदिकथी आचार्यनी हीलना करवा लाग्यो. ॥ ४३ ॥ त्यारे कलाचार्ये विचार्यु के, क्षीण शरीरवालाने खाटा भोजनथी जेम सोजो थाय (अने ते जेम लाभकारक नथी) तेम आने शास्त्र-

श्रमथी गुण थशे नहीं. ॥ ४४ ॥ वली अपात्रने कन्यादाननी पेठे ज्ञानदान पण अहितकारी छे, एम विचारि मनथी तो तेणे मने तज्यो, पण बहारथी द्वेष देखाड्यो नहीं ॥ ४५ ॥ वली मने तेवो जोइने राजकुमारो पण मारामांथी विरक्त थया, पण केवल मात्र पुण्यना प्रभावथी मने तेओ पराभव करवाने समर्थ थया नहीं. ॥ ४६ ॥ हवे एक दहाडो ज्यारे आचार्य बहार गया हता, त्यारे हुं तेमना आसनपर चडी बेठो; ते जोइने राजकुमारोए मने कह्युं के, आ तने उचित नथी. ॥ ४७ ॥ कह्युं छे के, गुरुना आसनपर बेसनाराओने कलंकथी उत्पन्न थएली मलीनता थाय, तथा अपजश अने पापनी वृद्धि थाय छे, अने

ज्ञानदानमपात्रस्य । कन्यादानमिवाऽहितम् ॥ त्यक्तस्तेनेत्यहं भावा—द्बहिर्द्वेषो न दर्शितः ॥ ४५ ॥ राजभिन्ना अपि प्रेक्ष्य । मामभूवंस्तथाविधम् ॥ विरक्ताः केवलं पुण्या—न्न पराभवितुं क्षमाः ॥ ४६ ॥ बहिर्गतेऽन्यदाऽऽचार्ये। मयाऽध्यस्तं तदासनम् ॥ तद् दृष्ट्वा राजभिन्ना मां । प्रोचुर्नेदं तवोचितम् ॥ ४७ ॥ यतः—गुर्वासने निविष्टानां। मालिन्यं स्यात्कलंकजम् ॥ वर्धेते चाऽयशःपापे । क्षरणं चायुषो भवेत् ॥ ४८ ॥ मयोक्तं शिक्षणार्होऽहं । बालिशाः किं भवादृशाम् ॥ यात स्वकुलशिक्षार्थं । तेऽपि तुष्णींस्थितास्ततः ॥ ४९ ॥ कलाचार्याय तत्प्रोक्तं । चरित्रं राजदारकैः ॥ क्रुद्धेन तेन पृष्टोऽहं । साऽसूयं भाषियं मया ॥ ५० ॥ अहो विमृश्य भाषित्व—महो ते शास्त्रकौशलम् ॥ असत्यवादिभिर्ब्रूषे । मामेवं यत्प्रतारितः ॥ ५१ ॥

आयुष्य ओछुं थाय. ॥ ४८ ॥ त्यारे में तेओने कह्युं के, अरे! मूर्खाओ!! शुं हुं तमारा जेवाओथी शिखामण देवाचा लायक छुं? (अर्थात् शुं तमो मने शिखामण देवा जोग छो?) तमारा पोताना कुटुंबने शिखामण देवा जाओ? (ते सांभली) तेओ पण मौन रह्या. ॥ ४९ ॥ पछी मारुं ते आचरण राजकुमारोए कलाचार्यने कह्युं; त्यारे तेणे क्रोध पामीने मने पूछयुं; त्यारे में इर्ष्या सहित कह्युं के, ॥ ५० ॥ अहो तारुं विचारयुक्त बोलवापणुं!! तथा अहो! तारुं शास्त्रोनुं कुशलपणुं! के, जूठुं बोलनाराओथी ठगा-

इने तु मने ग्राम बोले छे ! ॥ ५१ ॥ त्यारे ते महामति आचार्ये विचार्यु के, आ राजकुमारो जूठु बोलता नथी, पण आ पापी जूठो छे; माटे हवे तेनु ते दुराचरण नजरें जोइने हु तेने शिक्षा आपु ॥ ५२ ॥ हवे एक दहाडो तेणे गुप्त रहीने मने नेतरनी खुरशीपर बेठेलो जोइने ठपको अप्यो; त्यारे मे उलटो तेने तरफ छोडी कहाड्यो ॥ ५३ ॥ पछी राजकुमारोए गुरुने छानी रीते कह्यु के, नहीं जोवालायक एवा आ रिपुदारणने अमारी साथे राखवो युक्त नथी ॥ ५४ ॥ त्यारे तेणे पण विचार्यु के, आ बीचारा राजकुमारो सत्य कहे छे; अने आ पापी रिपुदारणने सत्संगमा राखवो अनुचित ज छे ॥ ५५ ॥ कह्यु छे के, उत्तम बुद्धिवाला माणसो क्रोधितने मिष्ट वचनोथी, लोभीने धनना दानथी, अहंकारीने विनयथी, कपटीने अविश्वासथी, चोरने रक्षणना प्रयत्नथी, लपटने सद्बुद्धिथी, मुर्खने मननी अनुवृत्तिथी वश करे छे, पण जूठाबोला माणसनो त्रणे जगतमां पण कोइ इलाज नथी; अने तेथी ते " कालथी डसाएलो " कहेवाय छे ॥ ५६ ॥ ५७ ॥ ५८ ॥ अथवा आ रिपुदारण स्वभावथी दुष्ट नथी, पण मृषावादथी

ततो महामतिर्दध्यो । न मृषा राजदारकाः ॥ ब्रुवतेऽयं परं पाप–स्तद् दृष्ट्वा शिक्षयाम्यहम् ॥ ५२ ॥ अन्यदा छन्नदेशस्थः । स मां वेत्रासनस्थितम् ॥ दृष्ट्वा ददावुपालंभं । कृतस्तन्निह्नवो मया ॥ ५३ ॥ ततो रहसि विज्ञप्तं । गुरवे राजदारकैः ॥ अदृष्टव्यो ह्ययं युक्तो । मध्ये स्थापयितुं न नः ॥ ५४ ॥ तेनापि चिंतितं सत्यं । वदंत्येते तपस्विनः ॥ पापोऽनुचित एवाऽयं । सत्संगे रिपुदारण. ॥ ५५ ॥ तथाहि–कुपितं मधुरैर्वाक्यै–रर्थदानेन लोभिनम् ॥ विनयेन जनं स्तब्ध–मविश्वासेन मायिनम् ॥ ५६ ॥ चौरं रक्षणयत्नेन । सद्बुद्ध्या पारदारिकम् ॥ वशीकुर्वंति सुधियो । मूर्खं चित्तानुवृत्तितः ॥ ५७ ॥ न तु कोऽपि प्रतीकारो । विद्यते भुवनत्रये ॥ असत्यवादिनः पुंसः । कालदष्टः स उच्यते ॥ ५८ ॥ त्रिभिर्विशेषकम् ॥ स्वभावादथवा दुष्टो । नास्त्ययं रिपुदारणः ॥ मृषावादान्मृषा ब्रूते । स्तब्धः स्याच्छैलराजतः ॥ ५९ ॥

ते जूठुं बोले छे, तथा शैलराजथी ते अहंकारी थयो छे.॥५९॥माटे ते बन्नेनो जो ते त्याग करे तो उत्तम लाभ थाय ते माटे तेने शिखामण आपुं, एम विचारि आचार्ये मने कह्युं के,॥६०॥हे कुमार! तारा जेवाओने माटे मारी शालामां खरेखर योग्य स्थानक नथी; माटे तुं शैलराज अने मृषावाद नामना पापी मित्रोने तजी दे?॥६१॥ त्यारे में कह्युं के, ते स्थानक त्यारे(तारा)बापने आप ?अमो तो ते(तारा)स्थानविना अने वली तारा विना पण बीजेथी सुखें समाधें शास्त्र भणिशुं.॥ ६२ ॥ एवी रीते आचार्यने तरछोडीने, स्तब्ध चित्तना विलेपनथी उंची डोक तथा उंचा मुखवालो थयो थको, तथा मारुं शरीर मरोडतो थको हुं त्यांथी

कुर्याद्यद्येतयोस्त्यागं । तदा स्याद्धितमुत्तमम् ॥ शिक्षयामि तदर्थं त–दित्याचार्यो जगाद माम् ॥ ६० ॥ कुमार नोचितं स्थानं । मच्छालायां किलेदृशाम् ॥ शैलराजमृषावादौ । पापमित्रे ततस्त्यज ॥ ६१ ॥ मयोक्तं स्थानमेतत्त्वं । यच्छ पित्रे विनाऽप्यदः ॥ विना च त्वां वयं शास्त्रं । भणिष्यामोऽन्यतः सुखम् ॥ ६२ ॥ तर्जयित्वेत्थमाचार्यं । स्तब्धचित्तविलेपनात् ॥ उत्कंधराननो मृद्न्--न्निजांगं निर्गतस्ततः ॥ ६३ ॥ प्राप्तस्तातांतिके पृष्ट--स्तेन पाठोऽवशिष्यते ॥ कियांस्तव मया प्रोक्तं । न न्यूना काऽपि मे कला ॥ ६४ ॥ तातः प्राह तथाऽप्युच्चैः । पूर्वाधीतं स्थिरीकुरु ॥ विद्यायां ध्यानयोगे च । संतोषो नोचितः सताम् ॥ ६५ ॥ भृतं धनैः पुनर्वेश्म । कलाचार्यस्य भूभृता ॥ माभूत् खेद इति प्रोक्तं । तेन मच्चरितं तु न॥६६॥कलाचार्य गृहे स्थेयं। भवताऽभ्यासशालिना॥ अतःप्रभृति तातेने–त्युक्तं तत्स्वीकृतं मया ॥ ६७ ॥

चालतो थयो. ॥ ६३ ॥ पछी हुं पिता पासे गयो, त्यारे तेमणे मने पूछयुं के, हवे केटलोक पाठ बाकी रहे छे ? त्यारे में कह्युं के, हवे मने कंइ पण कला अधुरी नथी. ॥ ६४ ॥ त्यारे वली पिताजीए कह्युं के, एम छे तो पण तुं पूर्वे शीखेलुं पाकुं कर ? केमके सज्जनोए विद्यामां अने ध्यान योगमां संतोष राखवो उचित नथी. ॥ ६५ ॥ वली फरीने राजाए कलाचार्यनुं घर धनथी भरी आप्युं; अने ते कलाचार्ये पण "आ राजाने खेद न थाय तो सारुं" एम विचारि मारुं आचरण राजाने कह्युं नहीं ॥ ६६ ॥ पछी

पिताजीए मने कह्यु के, आजथी हवे तारे अभ्यासमां मनोहर थइने कलाचार्यने घेर रहेवु; पछी ते मे पण स्वीकार्यु ॥ ६७ ॥ पछी त्यांथी निकलीने मे मृषावादने पूछ्यु के, हे मित्र ! तारी आ चतुराइ ते क्यांथी आवी ? के जेना वशथी मने आ तेज मल्यु छे ॥ ६८ ॥ त्यारे तेणे कह्यु के, राजसचित्त (नामना नगरमा) रागकेसरी नामे राजा छे; ते राजा शत्रुओरूपी सर्पोने (मारवामा) गरुड समान छे ॥६९॥ ते राजाने, कुक्षिमां राखेल छे गुणोनो समूह जेणीए एवी मूढता नामनी राणी छे, तथा तेणीने, छायाथी आच्छादित करेल छे त्रणे जगतो जेणीए एवी माया नामनी दीकरी छे ॥ ७० ॥ ते महान बेहेनने मे

निर्गतेन मृषावाद–स्ततः पृष्टो वयस्य ते ॥ दक्षता किमुपज्ञं य–द्वशान्मेऽनूदयं महः ॥६८ ॥ स जगौ राजसे चित्ते । राजास्ते रागकेसरी ॥ सरीसृपाणां शत्रूणां । त्रासने विनतासुतः ॥ ६९ ॥ तस्यास्ति मूढता देवी । कुक्षिक्षिप्तगुणोच्चया॥ मायाऽभिधास्ति तत्पुत्री । छाया छन्नजगत्त्रया ॥ ७० ॥ प्रतिपन्ना मया प्रेम्णा । भगिनी सा महत्तमा ॥ साऽपि छायेव मां मुक्त्वा । कदापि क्वापि याति न ॥ ७१ ॥ प्राप्तं तदुपदेशेन । मया कौशलमीदृशम् ॥ मयोक्तं दर्शनीया सा । ममाऽप्यात्मस्वसा त्वया ॥ ७२ ॥ तथेति स्वीकृतं तेन । ततो विलसितं मया ॥ शालासु द्यूतकाराणां । पणस्त्रीणां च वेश्मसु ॥ ७३ ॥ इत्थं द्वादशवर्षाणि । कलौघोपार्जनछलात् ॥ लंघितानि कुमार्गेण । मया तातमपश्यता ॥ ७४ ॥ मिथ्यावार्तारजःपुंजे । मयि धूमभ्रमाकिरौ ॥ पूर्णज्ञानाग्निसद्भावो । लोकैरनुमितस्ततः ॥ ७५ ॥

प्रेमथी स्वीकारी छे, अने तेथी ते छायानी पेठे मने तजीने कोइ पण समये क्यांए पण जती नथी ॥ ७१ ॥ तेणीना उपदेशथी मने आवी चतुराइ मली छे; त्यारे मे तेने कह्यु के, मने पण तारे ते तारी बेहेनने देखाडवी ॥ ७२ ॥ त्यारे तेणे पण ते स्वीकार्यु; पछी हु जुगारखानाओमां तथा वेश्याओना घरोमां विलास करवा लाग्यो ॥ ७३ ॥ अने एवी रीते कलाओ भणवाना मिषथी मे पिताजीने मोहोडु देखाड्या विनाज बार वर्षो कुमार्गमां गाल्यां ॥ ७४ ॥ पछी मिथ्या वचनरूपी रजना ढगलावाला

एवा हुंरुपी पर्वतमां धुंवाडाना भ्रमथी लोकोए संपूर्ण ज्ञानरुपी अग्नि होवानुं अनुमान कर्युं. ॥ ७५ ॥ हवे हुं स्त्रीओरुपी हरिणोने (बांधवामां) पाश सरखां, तथा मानरुपी हाथीने (वसवामां) विंध्याचल सरखां, अने कामदेवरुपी भ्रमरने (खुशी करवामां) कमल सरखां यौवनने पाम्यो. ॥ ७६ ॥ हवे सर्व नगरोना स्वामि एवा नरकेसरी नामना राजानी वसुंधरा नामनी राणीनी नरसुंदरी नामनी पुत्री छे. ॥ ७७ ॥ पछी ज्यारे ते यौवन पामी, त्यारे तेणीए मनमां एवो निश्चय कर्यो के, मारे खरेखर माराथी पण अधिक गुणवाला वरने वरवो. ॥ ७८ ॥ पछी नरकेसरी राजाए तेणीना ते भावने जाणीने

अथाहं यौवनं प्राप्तः । कामिनीमृगवागुराम् ॥ मानद्विरदविंध्याद्रिं । स्मरभृंगसरोरुहम् ॥ ७६ ॥ इतश्चाऽशेषपूःस्वामि–नरकेसरीनृपतेः ॥ देव्या वसुंधरायाश्च । सुताऽस्ति नरसुं-दरी ॥ ७७ ॥ तयोद्यौवनया चित्ते–ऽभिनिवेशोऽयमाहितः ॥ वरणीयो मया नूनं । मत्तो-ऽधिकगुणो वरः ॥ ७८ ॥ नरकेसरिणा ज्ञात्वा । तद्भावमिति चिंतितम् ॥ अस्याः समर्गलः स्याच्चे–त्स एव रिपुदारणः ॥ ७९ ॥ ततोऽसौ तां गृहीत्वैव । वरविद्यां परीक्षितुम् ॥ सि-द्धार्थनगरं प्राप्तः । पित्रा प्रीत्या प्रवेशितः ॥ ८० ॥ दत्तं चावासकस्थानं । सज्जीकृत्याथ मंड-पम् ॥ पतिंवरावरगुणान् । सभा चक्रे परीक्षितुम् ॥ ८१ ॥ राजान्वितः स्थितस्तात–स्त-न्मध्ये सपरिच्छदः ॥ समाहूतौ कलाचार्य–स्तत्राहं च समागतौ ॥ ८२ ॥

विचार्युं के, जो आनो भर्तार रिपुदारण थाय तो सरखे सरखुं (जोडुं) थाय. ॥ ७९ ॥ पछी ते तेणीने लेइने वरनी विद्यानी परीक्षा करवा माटे सिद्धार्थ नगरमां आव्यो; अने पिताए पण तेने प्रीतिथी प्रवेश कराव्यो. ॥ ८० ॥ वली तेओने (रहेवा माटे) आवास आप्यो, तथा पछी मंडप सज्ज करीने तेणे कन्याना तथा वरना गुणोनी परीक्षा करवामाटे सभा करी ॥ ८१ ॥ पछी पिताजी राजाओ तथा परिवार सहित ते मंडपमां बेठा, तथा बोलाव्याथी कलाचार्य

अने हु पण त्यां गयो ॥ ८२ ॥ हवे मारा दुराचरणनी चिंताथी पुण्योदयना तेजनी मदता थइ तथा प्रभाते जेम चद्रनो तेम तेनो चलकाट नष्ट थयो ॥ ८३ ॥ हवे पिताजीए कलाचार्यने चालती वातथी वाकेफ कर्यो; त्यारे मने घणो हर्ष थयो अने कलाचार्य मनमां हसवा लाग्यो ॥८४॥ पछी तेटलामां नरकेसरी राजा त्यां आव्यो; तथा तेनी पाछल नरसुदरीए पण सभामां प्रवेश कर्यो ॥ ८५ ॥ (हवे ते कन्या केवी हती ? तो के) लावण्यरूपी अमृतथी जाणे जगतना मनने प्लावन करती होय नही जेम, तथा चीकणा सिदूरथी भरेला सेंथाथी जीतेल छे सध्याकालना लाल आकाशने जेणीए एवी,

इतः पुण्योदयस्याऽनू–न्मद्दुश्चेष्टितचिंतया॥तेजोमांद्यमिति स्फुर्ति–र्गता प्रातर्विधोरिव॥८३॥
प्रस्तुतार्थोऽथ तातेन । कलाचार्याय ज्ञापितः ॥ जातो हर्षातिरेको मे। जहासांतः कलागुरुः ॥ ८४ ॥ अत्रांतरे समायातो । नृपतिर्नरकेसरी ॥ तदुत्तरं सभामध्ये । प्रविष्टा नरसुंदरी ॥ ८५ ॥ लावण्यामृतपूरेण । प्लावयंती जगन्मनः ॥ स्निग्धसिंदूरभृत्केश–जितसंध्यारुणांबरा ॥ ८६ ॥ द्योतयंती दिशां चक्रं । दीप्तेन वदनेंदुना ॥ कटाक्षैः पूरयंतीव । न्यस्तशस्त्रं स्मरेषुधिम् ॥ ८७ ॥ तरंती स्तनकुंभाभ्यां । शृंगाररसवारिधिम् ॥ उन्मादयंती जघन–पुलिनेन स्मरद्विपम् ॥ ८८ ॥ चटुलैर्मन्मथोल्लापै । र्हसंती कोकिलध्वनिम् ॥ अलंकारैर्मुनीनाम–प्याक्षिपंती च मानसम् ॥ ८९॥ चतुर्भिः कलापकम् ॥

तथा चलकाट मारता एवा मुखरूपी चद्रथी जाणे दिशाओना समुहने तेजस्वी करती होयनही एवी, तथा खलास थएलछे हथियारो जेमांथी एवां कामदेवना तुणीरने (भाथांने) जाणे (पोतानां) कटाक्षोथी भरती होय नहीं जेम एवी, तथा स्तनोरूपी कलशोथी जाणे शृंगाररसरूपी समुद्रने तरती होय नहीं जेम एवी, तथा (पोतानां) जघनस्थलरूपी रेताल काठाथी कामदेवरूपी हाथीने मदोन्मत्त करती होय नहीं जेम एवी, तथा मिष्ट एवां कामविकार सबधि वचनोथी जाणे कोयलना नादने हसी कहाडती होय नहीं जेम एवी, तथा (पोते पेहेरेलां) आभूषणोथी मुनिओना मनने पण चलायमान करती

थकी (तेणीए राज सभामां प्रवेश कर्यो.) ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ हवे तेणीने जोइने मारो शैलराज (अहंकार) स्फुरायमान थयो; अने तेथी में विचार्युं के, माराविना आने परणवाने वली बीजो कोण लायक छे ? ॥ ९० ॥ हवे नरकेसरी राजाए नरसुंदरीने कह्युं के, आ रिपुदारणने तारी इच्छा प्रमाणे कला संबंधि प्रश्न पूछ ? ॥ ९१ ॥ त्यारे तेणीए कह्युं के, गुरुजनोनी दृष्टिए मारे प्रश्न पूछवो यक नहीं; माटे ते आर्यपुत्र (रिपुदारण) प्रगट रीते सघली कलाओनो पाठ करी जाय; अने तेमां जे गुह्य बाबत हुं पूछुं, तेनो ते उत्तर आपे; ते सांभली सर्वे खुशी थया अने पछी पिताजीए कह्युं के,

जजृंभे शैलराजोऽथ । तां दृष्ट्वा मे ततो मया ॥ चिंतितं परिणेतुं मां । विनैनां क इवार्हति ॥८८॥ नरकेसरिराज्ञाऽथोऽभिहिता नरसुंदरी ॥ प्रश्नयैनं कलामार्गे । यथेष्टं रिपुदारणं ॥८९॥ सा प्राह मे गुरुजना—ध्यक्षं प्रश्नो न युज्यते ॥ तदुद्ग्राहयतु व्यक्त—मार्यपुत्रोऽखिलाः कलाः ॥८२॥ तत्र गुह्ये मया पृष्टे । निर्वाहं च करोत्वसौ ॥ तुष्टाः सर्वे तदाकर्ण्य । पिता प्राह ततश्च माम् ॥ ८३ ॥ युग्मम् ॥ उद्गृहाण कलाः पुत्र । राजपुत्र्या सुमंत्रितम् ॥ तदा विज्ञानशून्यस्य । स्तब्धा मम तु भारती ॥ ८४ ॥ महामतिः कलाचार्य--स्ततः पित्रा निरीक्षितः ॥ कुमारस्य दशा केय--मिति कर्णेऽस्य भाषितम् ॥ ८५ ॥ कर्णे तेन शनैः प्रोक्तं । देवक्षोभोऽयमांतरः ॥ पिताप्रोचे कुतोन्वेष । बभाषेऽथ महामतिः ॥ ८६ ॥ अर्थाऽज्ञानादयं क्षोभः । कुमारस्य तवाऽजनि ॥ वागायुधा हि वाग्युद्धे । क्षुभ्यंति ज्ञानमंतरा ॥ ८७ ॥

॥ ९२ ॥ ९३ ॥ हे पुत्र ! राजपुत्रीनो आ सारो विचार छे; माटे तुं (सर्व) कलाओनो पाठ करी जा ; हवे ते वखते ज्ञानथी शून्य एवो जे हुं, तेनी वाणी तो स्तब्ध थइ गइ. ॥ ९४ ॥ तेथी पिताजीए महामति कलाचार्यनी सामुं जोयुं; तथा तेना कानमां कह्युं के, कुमारनी आ शुं दशा थइ गइ ? ॥ ९५ ॥ त्यारे कलाचार्ये पण तेमना कानमां धीरेथी कह्युं के, हे राजन् ! आ तेनो अंतरनो क्षोभ छे; त्यारे पिताजीए कह्युं के, ते शीरीते ? त्यारे महामतिए कह्युं के. ॥ ९६ ॥ तमारा आ कुमारने अर्थना नहीं जाणपणाथी

आ क्षोभ थयो छे; केमके, वचनरूपी छे आयुद्ध जेओने एवा माणसो वाग्युद्धमां ज्ञान विना क्षोभ पामे छे ॥ ९७ ॥ त्यारे पिताजीए कह्यु के, आ कुमारने अज्ञान ते शीरीते संभवे ? केमके, सर्वे कलाविधिमां आने (अमोए) खरेखर पारगामी सांभल्यो छे ॥ ९८ ॥ त्यारे कलाचार्ये कह्यु के, आ कुमार शैलराजे तथा मृषावादे करेली बे कलाओमां कुशल छे; पण बीजी कलाओमा कुशल नथी ॥ ९९ ॥ त्यारे पिताजीए कह्यु के, ते बे कला केइ ? त्यारे कलाचार्ये कह्यु के, एक तो विनयनो नाश, अनें बीजुं जूठु बोलवु ते ॥ १०० ॥ पछी तेणे सर्व वृत्तांत मूलथी कही सभलाव्यो; त्यारे पिताजीए कह्यु के, एवी

तातः प्राह कुतोऽज्ञानं।कुमारस्यास्य युज्यते॥अयं प्राप्तप्रकर्षो हि।श्रुतः सर्वकलाविधौ ॥९८॥ ततः प्राह कलाचार्यो । दक्षोऽयं कलयोर्द्वयोः ॥ शैलराजमृषावाद–कृतयोर्न कलांतरे॥९९॥ तातः प्राह कले के ते । कलाचार्यो जगावथ ॥ एको विनयविध्वंसो । द्वितीयं कूटज्ञापणम् ॥ १०० ॥ ततः सर्वोऽपि वृत्तांतो । ज्ञापितस्तेन मूलतः ॥ राजाह तत्कथं जान–न्नेनं प्रावीविशः सन्नाम् ॥ १०१ ॥ महामतिर्जगौ देव । न मयेह प्रवेशितः ॥ मद्गृहान्निर्गतस्यास्य । गता द्वादशवत्सरी ॥ १०२ ॥ अकस्माद्भवतो देवा–ह्वानादहमिहागतः ॥ कुतश्चिदन्यतः स्थाना–दयमप्यत्र चागतः ॥ १०३ ॥ पिता प्राहार्य यद्येव । मपात्रं रिपुदारणः ॥ इयंतं कालमासीत्त–त्कुतोऽनूद्भाजनं श्रियः ॥ १०४ ॥ महामतिर्जगावस्य । सुहृत्पुण्योदयोऽस्ति यः ॥ दत्ता तेनेयती लक्ष्मीः । क्षीणोऽथास्यैप दोपतः ॥ १०५ ॥

रीते जाणतां छतां पण तमोए तेने सभामां केम प्रवेश कराव्यो ? ॥ १०१ ॥ त्यारे महामतिए कह्युं के, हे स्वामी ! मे तेने अहीं प्रवेश कराव्यो नथी; मारे घेरथी नीकल्याने तेने बार वर्षो वीती गयां छे ॥१०२॥ वली आपे मने अकस्मात् बोलाव्याथी हु अहीं आव्यो छु; अने आ कुमार पण कोइक बीजा स्थानकथी अही आवेलो छे ॥१०३॥त्यारे पिताजीए तेने कह्यु के,हे आर्य!ज्यारे आ रिपुदारण एवी रीते कुपात्र छे,त्यारे आटला बधा वखत सुधि ते लक्ष्मीना भाजनरूप केम थयो ?॥१०४॥ त्यारे महामतिए कह्यु के, तेनो पुण्योदय नामनो

जे मित्र छे, तेणे आटली लक्ष्मी तेने आपी छे; अने हवे ते आना दोषथी क्षीण थयो छे.॥१०५॥पछी मारा विकारने इलाज विनानो विचारता थका पिताजी राहुथी घेराएला चंद्रतुल्य मुखवाळा थया; अने ते हिलना लोकोए पण जाणी. ॥ १०६ ॥ वली आथी मारो परिवार पण विलखो थयो, नरसुंदरी खेद पामी, मशकराओ हसवा लाग्या; अने नरकेसरी राजा पण विस्मित थयो. ॥ १०७ ॥ हवे पिता अने आचार्यनी गुप्त वातोथी मारा मनमां एवो विकल्प थयो के, आ बन्ने मने बलात्कारे बोलावशे; माटे हवे शुं करुं ? ॥ १०८ ॥ तेथी हवे अत्यंत बीकना विकारथी मारी कंठनाडीओ स्तब्ध थइ; श्वासोश्वा-

ततो दुःप्रतिकारं म–द्विकारं चिंतयन् पिता ॥ राहुग्रस्तेंदुतुल्यास्यो । जातो ज्ञाता जनैः कृतिः ॥ १०६ ॥ म्लानोऽभूत्परिवारो मे । विषण्णा नरसुंदरी ॥ हसिताः सर्वतः खिंगा । विस्मितो नरकेसरी ॥ १०७ ॥ तातचार्यरहोजल्पा–द्विकल्पो मम चोत्थितः ॥ जल्पयिष्यत एतौ मां । प्रसह्येति करोमि किम् ॥ १०८ ॥ कंठनाड्यस्ततः स्तब्धा । भूरिभीतिविकारतः ॥ श्वासोच्छ्वासपथो रुद्धो । जाता मृत्यूचिता दशा ॥ १०९ ॥ ततः किमेतदित्यंगे । लग्ना विमलमालती ॥ आकुलः परिवारोऽभू–द्विस्मिता सकला सभा ॥ ११० ॥ विसृष्टाऽथ सभा पित्रा । कुमाराऽपाटवच्छलात् ॥ जहसुर्मम पांडित्यं । मानवा मिलिता बहिः ॥ १११ ॥ नरकेसरिणा ध्यातं । प्रस्थातव्यं मया प्रगे ॥ सुभोज्यमिव शास्त्रार्थो । ह्यंशेनैव परीक्ष्यते ॥ ११२ ॥

सनो मार्ग रुंधायो, तथा मृत्यु सरखी मारी दशा थइ. ॥ १०९ ॥ पछी “ आ ते शुं ? ” एम विचारती थकी विमलमालती मारे शरीरे वलगी तथा परिवार व्याकुल थयो, अने सर्व सभा विस्मित थइ. ॥ ११० ॥ हवे “ कुमारने शरीरे आज मजा नथी ” एवो मिष करीने पिताजीए सभाने विसर्जन करी; त्यारे बहार एकठा थएला मनुष्यो मारा पंडितपणानी हांसी करवा लाग्या. ॥ १११ ॥ पछी नरकेसरी राजाए विचार्युं के, हवे प्रभाते अहींथी चाली जवुं; केमके, उत्तम भोजननी पेठे शास्त्रार्थनी

पण अशमात्रथी परीक्षा कराय छे ॥ ११२ ॥ हवे पिताजीनो दिवस तो चिंता सहित केटलीक महेनतें व्यतीत थयो; तथा सुता थकां निद्राविना रात्रि पण केटलेक कष्टे नीकली ॥ ११३ ॥ हवे एटलामां मारा पुण्योदय नामना मित्रे लज्जातुर थइने विचार्यु के, जेनी हयाति छतां (तेना) आश्रितनी क्षति थाय, तेनो जन्म शा कामनो ? ॥ ११४ ॥ जे माणस पोताना आश्रितनु रक्षण करतो नथी, ते पवनथी पण हलको छे, केमके, पवन पण पाणीमां बुडती मशकने धारी राखे छे ॥ ११५ ॥ जो आ नरकेसरी राजा

कष्टेन तद्व्यतीतं च । दिनं तातस्य चिंतया ॥ कथंचन विना निद्रां । गता सुप्तस्य शर्वरी ॥ ११३ ॥ इतश्च मे सुहृत्पुण्यो–दयो ह्रीणो व्यचिंतयत् ॥ किं तस्य जन्मना यस्मिन् । सति स्यादाश्रितक्षतिः ॥ ११४ ॥ रक्षति स्वाश्रितं यो न । स लघुः पवनादपि ॥ पवनोऽपि यतो धत्ते । मज्जंतं दृतिमंभसि ॥ ११५ ॥ यायात्सुतामदत्वैव । यद्यसौ नरकेसरी ॥ ततः कुमारसान्निध्य–कारिणो मेऽयशो ध्रुवम् ॥ ११६ ॥ अयोग्यायापि तेनास्मै । दापयामि सुलोचनाम् ॥ इति ध्यात्वा पितुः स्वप्नं । निशाशेषे ददावसौ ॥ ११७ ॥ दृष्टस्तत्र वदन् कश्चित् । पुरुषः कुंदसुंदरः ॥ दापयिष्याम्यहं कन्यां । कुमारायेति मा शुचः ॥ ११८ ॥ तेन स्वप्नेन मुदित–स्तातः प्रातरबूबुधत् ॥ पुण्योदयस्तदा चक्रे । नरकेसरिणो धियम् ॥ ११९ ॥

(आ कुमारने) पुत्री दीधा विनाज जाय, तो कुमारने मदद करनारा एवा मारो खरेखर अपजश थाय ॥ ११६ ॥ माटे ते अयोग्यने पण हुं ते उत्तम लोचनवाली कन्या अपावु; एम विचारिने तेणे (थोडी) रात्रि बाकी रहेते छते पिताजीने स्वप्न आप्यु ॥ ११७ ॥ "हे राजन् ! हु कुमारने कन्या अपावीश, माटे शोक नही कर " "एवी रीते बोलता एवा कोइक मोगरा सरखा सुंदर पुरुषने तेणे स्वप्नमां जोयो ॥११८॥ हवे ते स्वप्नथी खुशी थएलो (मारो) पिता प्रभाते जागी उठयो; अने ते वखते पुण्योदये नरकेसरीने

एवी बुद्धि करी के, ॥ ११९ ॥ आ नरवाहन राजा त्रणे जगतमां गुणोथी प्रख्यात छे; तेम मारो अहीं आववानो हेतु पण बीजां राज्योमां प्रसिद्ध थयो छे. ॥ १२० ॥ माटे कन्या दीधा विना तो मारे जावुं ठीक नहीं; तेथी गमे तेम करीने पण आ कन्या ते कुमारने आपवी; अने जो एम नहीं करुं तो बन्ने पक्षनी हीनता थशे. ॥ १२१ ॥ पछी नरकेसरी राजाए ते अभिप्राय नरसुंदरीने कह्यो; त्यारे पुण्योदयनी आज्ञाथी तेणीए पण ते स्वीकार्यो; ॥ १२२ ॥ हवे नरकेसरी राजाए पिताजीने कह्युं के,

नरवाहनराजोऽयं । गुणैः ख्यातो जगत्त्रये ॥ हेतुर्ममागमस्यात्र । ज्ञातो राज्यांतरेष्वपि ॥ १२० ॥ ततः कन्यामदत्त्वैव । गमनं मे न शोभनम् ॥ यथाकथंचिद्देयाऽसौ । नोचेत्पक्षद्वय-क्षतिः ॥ १२१ ॥ तं भावं नरसुंदर्यै । प्रोवाच नरकेसरी ॥ तथेति प्रतिशुश्राव । साऽपि पुण्यो-दयाज्ञया ॥ १२२ ॥ नरकेसरीराजोऽथ । तातस्यैवमभाषत ॥ कुमारार्हैव कन्या मे । कृतं बहुविकत्थनैः॥१२३॥प्रतिशुश्राव तातस्त—त्प्रशस्ते वासरे ततः ॥ परिणीता मया तुङ्गैरुत्सवै-र्नरसुंदरी ॥ १२४ ॥ नरकेसरीराजोऽथ । मुदितः स्वाश्रयं गतः ॥ विनोदैर्नरसुंदर्या । गतः कालः कियान्मम ॥ १२५ ॥ आवयोः प्रेमसंबंधं । दृढं पुण्योदयोऽकरोत् ॥ मिथोविश्लेषर-हितं । चंद्रचंद्रिकयोरिव ॥ १२६ ॥ तं दृष्ट्वा सुहृदाभासौ । परमार्थेन वैरिणौ ॥ शैलराजमृ-षावादौ । परं क्रोधमुपागतौ ॥ १२७ ॥

आ मारी कन्या आ रिपुदारण कुमारनेज लायक छे, वधारे कहेवाथी सर्युं. ॥ १२३ ॥ पछी पिताजीए तेनुं ते वचन मान्य राख्युं; तथा पछी सारे दिवसे थोडा महोत्सव सहित हुं ते नरसुंदरीने परण्यो. ॥ १२४ ॥ हवे नरकेसरी राजा हर्षित थईने पोताने स्थानकें गयो; पछी ते नरसुंदरीनी साथे विनोद पूर्वक मारो केटलोक समय व्यतीत थयो. ॥ १२५ ॥ पछी जेम चंद्र अने चांदनीनो तेम जुदाइ विनानो अमारो अरसपरसनो प्रेमसंबंध पुण्योदयें द्रढ कर्यो. ॥ १२६ ॥ हवे तेने जोइने मित्राभास सरखा,

तथा परमार्थथी शत्रुभूत एवा शैलराज अने मृषावाद अत्यंत क्रोध पाम्या ॥ १२७ ॥ सत्संगना उदयने जोइनें खल माणस खेद पामेज छे; केमके, सूर्य कमलोने प्रफुल्लित करते छते शु घुवड खेद नथी पामतो ? (पामेज छे) ॥ १२८ ॥ पछी तेओ बन्नेए, अमो बन्नेनो स्त्रीभरतारनो वियोग कराववा माटे निश्चय कर्यो; अने मे ते स्त्रीने मेलवीने जगत्‌ने तृण समान गण्यु ॥ १२९ ॥ पछी स्तब्धचित्त (नामना विलेपनथी) लेपन युक्तथएल छे हृदय जेनुं एवो जे हु, तेणे विचार्युं के, मारा समान तो आ जगतमां कोइ पण नथी; के जेने आ आवी स्त्री मली छे ॥ १३० ॥

खलः खेदं प्रयात्येव । दृष्ट्वा सत्संगमोदयम् ॥ पद्मोल्लासे कृतेऽर्केण । किं न खिद्यति कौशिकः ॥ १२७ ॥ ततस्तौ द्वौ वियोगाय । जातौ नौ कृतनिश्चयौ ॥ मया तु तां समासाद्य । तृणवत्गणितं जगत् ॥ १२९ ॥ तदाऽहं चिंतयामिस्म । स्तब्धचित्तविलिप्तहृत् ॥ मत्तुल्यः कोऽपि नास्तीह । यस्य नार्येयमीदृशी ॥ १३० ॥ पुण्योदयस्तु मां दृष्ट्वा । तादृशं क्षीयतेऽनिशम् ॥ स्फुरद्वीचिमदोन्मादं । राकेंदुरिव सागरम् ॥ १३१ ॥ ततो मां तादृशं दृष्ट्वा । हसंति निखिला जनाः ॥ पश्यताहो विधेरीदृ–गस्थानविनियोजनम् ॥ १३२ ॥ स्त्रीरत्नमीदृगेतेन । मूर्खेण विनियोजयन् ॥ स्वाऽपवादं स्वहस्तेन । तेने वेदजडो विधिः ॥ १३३ ॥ करिणीवखरे कल्पलतेवैरंडपादपे ॥ अस्मिन्नियोजिता ह्येषा । ऽपकीर्तिर्विश्वेरतसः ॥ १३४ ॥

हवे उछलता एवा मोजाओ रूपी मदना उन्मादवाला समुद्रने जोइने जेम पूर्णिमानो चंद्र, तेम तेवी रीतना मने जोइने, पुण्योदय तो क्षय थवा मांड्यो ॥ १३१ ॥ पछी मने तेवो जोइने सर्व लोको हांसी करवा लाग्या के, अहो! विधिनी आ आवी अयोग्य योजना तो जुओ!! ॥ १३२ ॥ वली आ आवां स्त्रीरत्नने आ मूर्ख साथे जोडीने वेदजड ब्रह्माए पोताने हाथेज पोतानो अपवाद विस्तार्यो छे ॥१३३॥ वली तेणे गधेडा प्रते जेम हाथणीने, तथा एरंडना वृक्षप्रते जेम कल्पलताने, तेम आ कुमारप्रते आ

अपकीर्तिज छे. ॥ १३४ ॥ आ कुमार पूर्वे मूर्खताथी अंध थयो हतो;
स्त्रीने जोडी छे; माटे ते ब्रह्मानी अपकीर्तिज छे. ॥ १३४ ॥ आ कुमार पूर्वे मूर्खताथी अंध थयो हतो; अने हवे गर्वथी अंध थयो छे; माटे वृषणपर भमराथी डंखाएला वांदराना उच्छृंखलपणा सरखुं ते थयुं छे. ॥ १३५ ॥ हवे एक दहाडो सद्भावने जाणवानी इच्छावाली ते नरसुंदरी, अज्ञानथी उत्पन्न थएला मारा मनना क्षोभने जाणती थकीज मने कहेवा लागी. ॥ १३६ ॥ हे आर्यपुत्र! (ते दिवसे) सभामां आपनी तबीयत केवीक थइगइ हती? (ते सांभली) ते वखते योगशक्तिथी मृषावाद मारा मुखमां दाखल थयो. ॥ १३७ ॥ पछी में कह्युं के, कलाओ तो बधीए मारा हृदयमां स्फुरायमान थइ छे.

जाम्यांधः प्रागभूदेष । गर्वेणांऽधोऽधुनाऽजनि ॥ कपेस्तदेतत्कापेयं । दष्टस्य वृषणेऽलिना ॥१३५॥ जिज्ञासमाना सद्भाव--मन्यदा नरसुंदरी ॥ अज्ञानजं मनक्षोभं । जानानेव जगाद माम् ॥ १३६ ॥ आर्यपुत्र सभायां ते । कीदृगासीदपाटवम् ॥ योगशक्त्या तदाविष्टो । मृषावादो मदानने ॥ १३७ ॥ ततो मयोक्तं हृदये । कलाः सर्वाः स्फुरंति मे ॥ नाऽस्वस्थोऽपि तदाऽभूवं । पितृभ्यां त्वाकुलीकृतः ॥ १३८ ॥ व्यलीकभावं श्रुत्वैत--ज्जगाम नरसुंदरी॥ दध्यावहो विलज्जत्व--महो प्रत्यक्षनिन्हवः ॥ १३९ ॥ सा प्रत्युवाच यद्येवं । ततो मे कौतुकं महत् ॥ अद्यापि श्रोतुमिच्छामि । कीर्त्यमानां कलां त्वया ॥ १४० ॥ मया ध्यातं हसत्येषा । स्वपांडित्यमदेन माम् ॥ तत्पराभवकृत्पापा । न स्थाप्या दृष्टिगोचरे ॥ १४१ ॥

तेम ते वखते हुं कंइ नादुरस्त पण नहोतो; पण मातापिताए मने मुंझावी नांख्यो हतो. ॥ १३८ ॥ ते सांभलीने नरसुंदरीए जाण्युं के, आ जूठुं बोले छे; तथा पछी तेणीए विचार्युं के, अहो! आनुं निर्लज्जपणुं (केवुं छे!!) तथा अहो! आ प्रत्यक्ष वातने जूठी करनारो छे. ॥ १३९ ॥ पछी तेणीए कह्युं के, जो एम छे, तो मने मोटुं कौतुक छे; माटे हजु पण आपनाथी पठन कराती कलाने सांभलवाने हुं इच्छुं छुं. ॥ १४० ॥ त्यारे में विचार्युं के, आ स्त्री पोताना पंडितताना मदथी मारी हांसी करे छे; माटे

॥ १४१ ॥ हवे स्तब्धचित्त (नामना पराभव करनारी आ पापीष्ट स्त्रीने मारी दृष्टि आगल न राखवी ॥ १४१ ॥ हवे स्तब्धचित्त (नामना
विलेपनथी) लिप्त थएला हृदयवाला एवा मे कह्यु के, अरे ! ! तुमारी दृष्टिथी (दूर) चालीजा ? तारे (हवे)
अहीं रहेवु उचित नथी ॥ १४२ ॥ (केमके) तु पंडिता छे, अने हु तो मूर्ख छुं; माटे आपण बन्नेनो
सग उलट पालट छे; अने तेथी हवे योग्यना संगथीज तु तारी पंडितताने सफल कर ? ॥ १४३ ॥
पछी मने खुशी करवाने अयोग्य, तथा मदोन्मत्त जाणीने, मंत्रथी हणाएली नागणीनी पेठे, अकु-
शथी हणाएली हाथणीनी पेठे, मूलमांथी उखडेली वेलडीनी पेठे, तथा वादलांओथी छवाएली चंद्रनी

स्तब्धचित्तविलिप्तात्म–हृदयेनाथ ज्ञापितम् ॥ गच्छ रे दृष्टिमार्गान्मे । नेह स्थातुं तवोचितम्
॥ १४२ ॥ पंडिता त्वमहं मूर्खः । संगोनावसमंजसः ॥ तद्योग्यसंगमेनैव । स्वं पांडित्यं
कृतार्थय ॥ १४३ ॥ ज्ञात्वा प्रसादनाऽयोग्यं । ततः सा मां मदोद्धतम् ॥ मंत्राहता भुजंगीव ।
करिणीवांकुशक्षता ॥ १४४ ॥ वल्लीवोन्मूलिता चांडी । ज्योत्स्नेव घनसंहता ॥ सर्वथा दीन-
वदना । साध्वसक्षीणमानसा ॥ १४५ ॥ दृष्ट्वेव कलुषं चित्त–सरोऽन्यत्र यियासतः ॥ विरुतैः
स्नेहहंसस्य । शोभिता नूपुरारवैः ॥ १४६ ॥ निर्गता मामकगृहात् । प्राप्ता मज्जननीगृहम् ॥
स्थितोऽहं स्तंभवत्ताव–दशुष्यति विलेपने ॥ १४७ ॥ चतुर्भिः कलापकम् ॥ जातो मेऽनुशय-
स्तत्र । मनाक् शोषमुपागते ॥ उद्भूताः सात्विका भावा–स्तद्रागो मामबाधत ॥ १४८ ॥

चांदनीनी पेठे, सर्वथा प्रकारे म्लान मुखवाली तथा भयथी क्षीण मनवाली थइ थकी, तथा मारां मन-
रुपी तलावने जाणे कलुषित थएलु जाणीने बीजी जगोए जवाने इच्छता एवा स्नेहरुपी हंसना
जाणे शब्दोथी होय नहीं जेम, तेम झांझरोना शब्दोथी शोभिती थइ थकी मारा घरमांथी निकलीने
ते मारी मातानें घेर गइ; तथा हु, विलेपन नहीं सुकाइ जवाथी ते वखते स्तभनी पेठे (स्थिर) रह्यो
॥ १४४ ॥ १४५ ॥ १४६ ॥ १४७ ॥ पछी ते विलेपन जरा सुकाइ जवाथी त्यां मने पश्चात्ताप थयो; तथा

कौतुक भावो प्रगट थया; अने तेणीनो राग मने दुःख आपवा लाग्यो. ॥ १४८ ॥ हवे एटलामां(मारी) माता विमल मालती त्यां आवीने भद्रासनपर बेठी; अने (ते वखते) में पण मारो आकार छुपाव्यो. ॥ १४९ ॥ पछी मारी माताए (मने) कह्युं के, हे वत्स ! तें आ नरसुंदरीने जे कठोर वचनोथी तरछोडी, ते तें ठीक न कर्युं. ॥ १५० ॥ हिमथी युक्त थएलां छे पत्रो जेनां एवी कमलिनी सरखी, तथा आंसुसहित आंखोवाली एवी ते नरसुंदरी अहींथी (तारी पासेथी) निकलीने कंपती थकी मारे पगे आवीने पडी. ॥ १५१ ॥ पछी में तेणीने पूछयुं के, आ तने शुं थयुं ? त्यारे तेणीए कह्युं के, मने ताप पीडा करे छे;

अत्रांतरे समायाता । माता विमलमालती ॥ स्थिता भद्रासनेऽकारि । मया चाकारगोपनम् ॥ १४९ ॥ ततो माता जगौ वत्स । सुंदरं न कृतं त्वया ॥ तिरस्कृता खरैर्वाक्यै--र्यदियं नरसुंदरी ॥ १५० ॥ अब्जिनीव हिमाश्लिष्ट--दलोदश्रुविलोचना ॥ निर्गतेयमितः कंप्रा । पतिता मम पादयोः ॥ १५१ ॥ मया पृष्टं किमेत्तते । साह मां बाधते ज्वरः ॥ प्रवालशयने शीते । शायिता मयका ततः ॥ १५२ ॥ खाद्यमानेव सिंहेन । प्लुष्यमाणेव वह्निना ॥ प्रतिक्षणं मया दृष्टा । तत्रोद्वर्तनतत्परा ॥ १५३ ॥ ततो मया पुनः पृष्टं । ज्वरस्तेऽयं कुतोऽजनि ॥ अथ सा दीर्घनिःश्वासैः । प्रत्यूचे न गिरा पुनः ॥ १५४ ॥ निश्चित्य मानसीं पीडां । पृष्टा निर्बंधतोऽथ सा ॥ त्वत्कृतस्यापमानस्य । सर्वां वार्तामचीकथत् ॥ १५५ ॥

त्यारे में तेणीने किसलयोना शीतल बीछानापर सुवाडी. ॥ १५२ ॥ पछी जाणे सिंहथी भक्षण करातो होय नहीं जेम, तथा अग्निथी जाणे दाझती होय नहीं जेम, तेम तेणीने ते पथारीपर दरेकक्षणे तरफडीयां मारती में जोइ. ॥ १५३ ॥ पछी में फरीने तेणीने पूछयुं के, तने आ ताप क्यांथी थयो ? त्यारे तेणीए लांबा निसासाओ सहित मने वचनथी जवाब न आप्यो. ॥ १५४ ॥ पछी में तेणीनी मन संबंधि पीडानो निश्चय करीने दबाणथी पूछयुं, त्यारे तेणीए तें करेला अपमाननी सर्व वात कही. ॥ १५५ ॥

पछी में शीतोपचार करीने तेणीने शांत करी; अने कह्युं के, हे वत्से ! तुं धैर्यवाली था ? उद्वेगने छोडी दे ? अने साहसनो आश्रय कर ? ॥ १५६ ॥ हु कुमारनी पासे जउं छुं, अने तेने ताराप्रते प्रेमवालो करु छुं; वली ते प्रतिकूलने नहीं सहन करनारा एवा ते(तारा) मानी भर्तारने तारे सारी रीते आराधवो ॥१५७॥ एवी रीतनी मारी वाणी सांभलीने, तथा तेने स्वीकारीने, वरसादना पाणीथी भीजाएली तलावडीनी जमीननी पेठे, ते उच्छ्वासने पामी ॥ १५८ ॥ माटे वक्र रीते चालता एवा ते, तेणीना नेत्रमां अकाल वृष्टि करी छे, माटे हवे हे वत्स ! सावधान थइने ते वृष्टिने तु वार ? ॥ १५९ ॥ वली ते बाला तारी

कृत्वा शीतोपचारौघं । ततः साऽश्वासिता मया ॥ वत्से धीरा भवोद्वेगं । मुंचालंबस्व साहसम् ॥ १५६ ॥ यामि पार्श्वे कुमारस्या–ऽनुकूलं ते करोमि तम् ॥ प्रतिकूलाऽसहो मानी । स्वाराध्योऽयं त्वया परम् ॥ १५७ ॥ इमां मद्वाचमाकर्ण्य । तथेति प्रतिपद्य सा ॥ उच्छ्वासं प्राप मेघांबु–पृक्ता पल्वलभूरिव ॥ १५८ ॥ वक्रेण चलता तस्मा–द्वृष्टिराकालिकी कृता ॥ तन्नेत्रयोस्त्वया वत्स । प्रगुणीभूय वार्यताम् ॥ १५९ ॥ साऽग्नौ दंदह्यते बाला । ज्ञात्वा त्वत्प्रतिकूलताम् ॥ मज्जत्यामज्जममृते । श्रुत्वा भाव्यनुकूलताम् ॥ १६० ॥ अतो यन्मुग्धया किंचि–दपराद्धं तया तव ॥ प्रणतेषु दयाशाली । तद्भवान् क्षंतुमर्हति ॥ १६१ ॥ भवामि यावत्प्रगुणः । श्रुत्वेमां जननीगिरम् ॥ मम तावद्गिरींद्रेण । दत्तं हृदि विलेपनम् ॥ १६२ ॥ जननीवाग्गुणारूढ–स्तेनाकृष्य वचःशरान् ॥ चापीकृतः प्रवृत्तोऽहं । परुषानथ वर्षितुम् १६३

प्रतिकूलताने जाणीने अग्निमां बले छे; अने हवे थनारी अनुकूलताने सांभलीने अमृतमां नाहे छे, ॥ १६० ॥ माटे ते भोली स्त्रीए तारो जे किंचित् अपराध कर्यो होय, तेने नमता प्रते दयालु एवा तारे क्षमा करवी लायक छे ॥ १६१ ॥ एवी रीतनी मातानी वाणी सांभलीने जेटलामां हु कइक नरम पडु छु तेटलामां तो शैलराजे (अहकारे) मने हृदयमां (पोतानु) विलेपन आप्यु ॥ १६२ ॥ अने तेनाथी धनुष्यरूप कराएलो एवो हु, मातानी वाणी रूपी दोरीपर चडीने तथा कठोर वचनोरूपी बाणोने खेंचीने

वरसाववा लाग्यो के, ॥ १६३ ॥ हे माता ! तारे ते दुष्ट स्त्री साथे मने सल्लाह कराववी नहीं; तथा असाध्य सिद्धिनो स्नेही (अर्थात् न बनी शके) एवो तारो आ प्रयत्न अहीं निष्फल छे. ॥ १६४ ॥ जे स्त्री पोताने तो पंडित माने छे, अने मने मूर्ख माने छे, तेणी साथे युक्त स्नेह करवाने हुं इच्छतोज नथी. ॥ १६५ ॥ पछी मारी माताए तेनी पासे जइने ते वृत्तांत कह्यो; त्यारे ते पण जाणे वज्रथी हणाइ होय नहीं तेम मूर्छित थइने पृथ्वीपर पडी. ॥ १६६ ॥ पछी शीतल एवा पंखाओना पवनथी मलेल छे चैतन्य जेणीने एवी ते नरसुंदरी छुटेलां एवां चक्षुना झरणोथी (अर्थात् आंसुओथी) जमीनने भींजाववा लागी.॥१६७॥

न कार्यं मम संधानं । पापयाऽब तया सह ॥ असाध्यसिद्धिप्रणयी । यत्नोऽत्र तव निष्फलः॥ ॥१६४॥या मन्यते स्वमात्मानं । पंडितं मां च बालिशम्॥सर्वथा नोत्सहे युक्तं । स्नेहं कर्तुं तया सह ॥१६५॥ततः प्रतिगता माता । तस्यै व्यतिकरं जगौ॥पपात मूर्छिता भूमौ । ततो वज्रहतेव सा ॥ १६६ ॥ शीतलैर्लब्धचैतन्या । तालवृंताऽनिलैरथ ॥ भुवं प्लावयितुं लग्ना । मुक्तैर्नयन निर्झरैः ॥ १६७ ॥ सा ववर्षाश्रुवारीणि । वियोगाग्निव्ययेच्छया ॥ विदांचकार बालांत—र्न चैनं वरुवानलम् ॥ १६८ ॥ मात्राऽथाभिहितं पुत्रि । शोकोऽयं प्रविमुच्यताम् ॥ स्वयं गत्वा प्रसाद्योऽयं । कठोरहृदयः प्रियः ॥ १६९ ॥ आर्द्रीकर्तुं मनः शक्यं । कामिनां मार्दवांबुना ॥ उपायमेकमित्येनं । कृत्वा स्वनियतिस्थिरा ॥ १७० ॥ तथेति सा प्रतिश्रुत्य । मां सांत्वयितु-मागता ॥ अंबाऽप्यनुपदं लग्ना । तदायतिदिदृक्षया ॥ १७१ ॥

वली ते वियोगरूपी अग्निना नाशनी इच्छाथी आंसुरूपी पाणीने वरसाववा लागी; पण ते बालिकाये ते वडवानलने अंतःकरणमां जाण्यो नहीं. ॥ १६८ ॥ पछी मारी माताए तेणीने कह्युं के, हे पुत्रि ! आ शोकने हवे तजी दे ? अने हवे तारे पोताने जइने ते कठोर मनवाला तारा भरतारने समजाववो. ॥ १६९ ॥ वली कामिओनां मनने मार्दवरूपी पाणीथी भींजावी शकाय छे; माटे ते एक उपाय करीने तारी नियतिमां तुं स्थिर था ? ॥ १७० ॥ पछी ते वात स्वीकारीने ते नरसुंदरी मने शांत करवाने आवी; तथा मारी

माता पण तेनुं परिणाम जोवानी इच्छाथी तेनी पाछल आवी. ॥ १७१ ॥ पछी ते नरसुंदरी आंखोमां आसु लावीने मारे पगे पडी; तथा कहेवा लागी के, हे स्वामी!तमो मारापर कृपा करो!आप शिवाय मने बीजु कोइ शरणुं नथी ॥ १७२ ॥ हवे एवी रीतनी तेणीनी प्रियवाणीथी सिचाएली एवी मारी चित्त रूपी भूमि क्षण वार तो आर्द्रपणाने पामी; तथा पाछी शैलराजना प्रतापरूपी अग्निथी शोपाती थकी क्षणवारमां काठिन्यताने प्राप्त थइ ॥ १७३ ॥ हवे अहकारने अगाडी करीने तेणीने मे अत्यत तरछोडी कहाडी के, अरे !! दुष्टा ! अहीथी चाली जा ! ! चाली जा !! ते तारी मायाथी (कपटथी)

प्रणतोदश्रुनेत्राऽथ । मत्पादौ नरसुंदरी॥प्रसीद त्वांविना त्राणं । मम नास्तीति वादिनी॥१७२॥
क्षणं प्रियोक्तिसिक्ता म-च्चित्तभूरार्द्रतां ययौ॥क्षणं काठिन्यमर्हंड्–प्रतापातपशोषिता॥१७३॥
अथ मानं पुरस्कृत्य । मया सा भर्त्सिता भृशम् ॥ आः पापे गच्छ गच्छेतो । मायया कृतमे-
तया ॥ १७४ ॥ कुशलाऽपि कलासु त्वं । कर्तुं शक्ताऽसि वंचनम् ॥ परेषामेव न पुन–र्मू-
र्खाणामपि मादृशाम् ॥ १७५ ॥ इत्युक्त्वा मौनमालंब्य । शैलराजवशंवदः ॥ स्थितोऽहं
स्तब्धसर्वांगो । हिमाक्रांत इवोच्चकैः ॥ १७६ ॥ खेचरी नष्टविद्येव । खिन्ना सा नरसुंदरी ॥
ततः प्राणपरित्याग–कृते गंतुं प्रचक्रमे ॥ १७७ ॥ गतस्तदनुमार्गेऽहं । करोति किमसाविति ॥
दुश्चेष्टामदिदृक्षुर्मे । गतोऽस्तं तरणिस्तदा ॥ १७८ ॥

सर्यु !! ॥ १७४ ॥ वली कलाओमां कुशल एवी पण तुं बीजाओने ठगवाने शक्तिवान् छे ! पण मारा जेवा मूर्खने ठगवाने शक्तिवान् नथी ॥ १७५ ॥ एम कहीने शैलराजने वश थयो थको हुं, जाणे बरफथी पीडित थयो होउ नहीं जेम तेम स्तब्ध थएल छे सर्व अंगो जेना एवो हु मौन धरीने उभो ॥१७६॥ त्यारे नष्ट थइ छे विद्या जेनी एवी विद्याधरीनी पेठे ते नरसुदरी खेद पामी, तथा त्यांथी प्राणोनो त्याग करवा माटे ते चालवा लागी ॥ १७७ ॥ पछी “ आ (हवे) शु करे छे ? ” एम विचारि हु तेणीनी पाछल गयो; तथा ते वखते मारा दुराचारने जोवाने नहीं इच्छतो एवो सूर्य (पण) अस्त

पाम्यो. ॥ १७८ ॥ हवे रात्रिए ते एक शून्य स्थानकमां गइ; तथा (ते वखते तेणीने) दशमी दशाने (मृत्यु दशाने) आपनारा एवा कामदेवनुं जाणे मुखज होय नहीं जेम, तेम चंद्र उग्यो. ॥ १७९ ॥ पछी त्यां जोवा माटे हुं गुप्त थइने बारणे उभो; हवे त्यां (अपाशया एटले) गयेली छे आशा जेणीनी (एवी पण तेणीए) अहो ! पाशने (फांसाने) तैयार कर्यो. ॥ १८० ॥ हवे ते विरोधपक्षे–पाशविनानी समये में विचार्युं के, आणे जे मने कह्युं, ते मारो पराभव करवा माटे नथी; अने तेमां प्रेम कारणभूत छे. ॥ १८१ ॥ माटे में आ ठीक कर्युं नहीं, अने तेथी हजु पण हुं तेणीने वारुं, एवी रीतना भावथी

निशि साऽथ गतैकत्र । शून्यवासे स्मरस्य च ॥ चंद्रो मुखमिवोदीतो । दास्यन्तो दशमीं दशाम् ॥ १७९ ॥ छन्नात्मा द्वारदेशेऽहं । स्थितस्तत्र विलोकितुम् ॥ अपाशयाऽप्यहो तत्र । पाशः सज्जीकृतस्तया ॥१८०॥ अत्रान्तरे मया ध्यातं । यदुक्तमनया मम ॥ न तत्पराभवं कर्तुं । प्रणयस्तत्र कारणम् ॥ १८१ ॥ तन्मया न कृतं सम्यग् । वारयाम्यधुनाप्यमूम् ॥ इतो भावादिति च्छेत्तुं । पाशकं प्रयतो यदा ॥१८२॥ सा तदोवाच दिक्पाला । मम प्राणान् प्रतीच्छत ॥ मान्दीदृग् व्यतिकरो । मम जन्मांतरेऽपि च ॥१८३॥ युग्मम् ॥ तस्यार्थं शैलराजो मे । विपरीतमिदं जगौ ॥ पश्य जन्मांतरेऽप्येषा । त्वत्संबंधं न वांछति ॥१८४॥ कूटार्थदुर्विदग्धेन । मया तूष्णींस्थितं ततः ॥ तया प्राणाः परित्यक्ता । बाणा इव धनुष्मता ॥१८५॥ इतश्च निर्यतीं गेहाद् । दृष्ट्वा नरसुंदरीम् ॥ मां च तत्पृष्टतो लग्न–मागताऽनुपदं शनैः ॥ १८६ ॥

जेटलामां हवे हुं तेनो पाश छेदवाने तैयार थयो, तेटलामां ते बोलवा लागी के, हे दिक्पालो मारा प्राणोने तमो स्वीकारो ? अने जन्मांतरमां पण मारा आवा हालहवाल नहीं थजो ? ॥ १८२ ॥ १८३ ॥ तेणीना ते शब्दोनो शैलराजे मने एवो उलटो अर्थ कह्यो के, जो ! ! आ नरसुंदरी तो जन्मांतरमां पण तारा संबंधने इच्छती नथी. ॥ १८४ ॥ पछी ते जूठा अर्थने जाणनारो एवो हुं पण मौन रह्यो; अने तेणीए, धनुषधारी जेम बाणोने, तेम प्राणोने तजी दीधा. ॥ १८५ ॥ हवे नरसुंदरी ने घरमांथी

नीकलती अने मने तेणीनी पाछल जतो जोइने मारी माता पण धीरे धीरे पाछल आवी ॥ १८६ ॥ हवे त्या तेणीए ते नरसुदरीने तेवी रीतनी दीठी; त्यारे तेणीए चिचार्यु के, मारा पुत्रनी आ वार्ता (आ कार्य) लागे छे ॥ १८७ ॥ केम के, जो एम न होय, तो आ नरसुदरीना आवा हाल होते छते ते केम शोच करे ? एवी रीतना शोकथी मारी माताए पण मारा देखतांज प्राणत्याग कर्यो ॥१८८॥ हवे ते वखते मारु शैलराज सबधि लेपन कइक सूकायु; त्यारे स्नेह भावथी मे क्षणवार पश्चाताप कर्यो ॥ १८९ ॥ त्यारे शैलराजे मने एवो टेको आप्यो के, कठिन हृदयवाला एवा क्या पुरुपो स्त्रीना नाशथी

दृष्टा तथाविधा तत्र । तया सा नरसुंदरी ॥ दध्यौ च मत्सुतस्याऽपि वार्तेयं ववृतेतराम् ॥१८७॥ एवं स्थितायामेतस्यां । शोचेन्नोचेदसौ कथम् ॥ शोकादित्यंबयाप्यात्मा । त्यक्तः पश्यत श्चेव मे ॥ १८८ ॥ तदा मम मनाक् शुष्कं । शैलेंडीयं विलेपनम् ॥ स्नेहविह्वलभावेन । पश्चात्तापः कृतः क्षणम्॥१८९॥पुरुषाः कठिनस्वांताः । स्त्रीविनाशे रुदंति के ॥ शैलस्येत्यवष्टंभात् । स्थितस्तूष्णीमहं ततः ॥१९०॥ इतः कदलिकाऽयाता । न्वेष्टुं तत्रैव मातरम् ॥ सा मदंबाप्रिये दृष्ट्वा। मृते चक्रे महारवम्॥१९१॥महान् कोलाहलो जातः।सतातं मिलितं पुरम्॥किमेतदिति पृष्टा च । जानाना साऽखिलं जगौ ॥ १९२ ॥ तातायाऽदर्शयल्लीनं । स्फुटश्चंद्रोदयोऽथ माम् धिक्कृतोऽहं ततः पित्रा । संप्रत्ययमुपेयुषा ॥ १९३ ॥

रडे छे ! ! (ते सांभली) हु मौन रह्यो ॥ १९० ॥ एटलामां (मारी) माताने शोधवा माटे कदलिका त्या आवी; तथा मारी माता अने स्त्रीने मरेलां जोइने मोटो पोकार करवा लागी ॥ १९१ ॥ पछी त्यां मोटो कोलाहल थयो; तथा पिताजी सहित (सघलुं) नगर एकठुं थयुं; पछी ते कदलिकाने पूछ्युं के, आ शुं थयु ? त्यारे जाणती एवी तेणीए सघलो वृत्तांत कह्यो ॥ १९२ ॥ हवे छुपाइ रहेला एवा मने, प्रगट थएला चद्रोदये पिताजीने देखाडी आप्यो; पछी पिताजीने खातरी आववाथी तेणे मने धिक्कारी

कहाड्यो ॥ १९३ ॥ हवे पिताजीए (मारी) माता अने नरसुंदरीनुं मृतकार्य करीने, तथा मारुं घोर कार्य जोइने विचार्युं के, ॥ १९४ ॥ अहो ! आ तो अनर्थोनो समूह छे, तथा अहो ! आ तो कुलप्रते अग्नि-सरखो छे; माटे आवा आ दुष्ट पुत्रनुं मारे प्रयोजन नथी. ॥१९५॥ एम विचारिने पिताजीए मने घर-मांथी बहार कहाडी मेल्यो; पछी दुःखी थयो थको, निर्धन थइने ते नगरमां हुं भटकवा लाग्यो.॥१९६॥ त्यां हुं ते समये बालको प्रते पण निंदनीक थयो; तो पण महामोहरूपी (रथने खेडवामां) बलद सरखो

अथांबानरसुंदर्यो । मृतकार्यं विधाय सः ॥ मत्कर्म दारुणं दृष्ट्वा । चिंतयामास चेतसि॥१९४॥
अहो अनर्थपुंजोऽय—महो अेष कुलानलः ॥ प्रयोजनं न पुत्रेण । ममानेन दुरात्मना ॥१९५॥
इत्थं विचार्य तातेन । गृहान्निष्काशितो बहिः॥विचरामिस्म निःश्रीकः । पुरेऽहं तत्र दुखितः ॥
॥१९६॥बालानामपि तत्राहं । तदा जातो विगर्हितः ॥ तथापि चिंतयामिस्म । महामोहरथ-स्य गौः॥१९७॥तातेनाऽपि परित्यक्तो । निंदितोऽप्यखिलैर्जनैः ॥शैलराजमृषावादा—श्रितोऽहं नाऽस्मि दुःखितः ॥ १९८ ॥ युग्मम्॥प्रज्ञावादनयोरेव । पूर्वं ज्नुक्तं मया सुखम् ॥ पुनर्ज्ञोक्ष्ये च कालस्या--ऽानुकूल्यान्नात्र संशयः॥ १९९ ॥ व्यतीयुर्न्भूरिवर्षाणि । स्थितस्यैवं ममाथ सः॥ सुहृत्पुण्योदयः क्षीणःास्थितोऽकिंचित्करः परम् ॥ २०० ॥ गतो राजाऽन्यदा वाजि—वाहनार्थं वने क्वचित् ॥ गतः कुतूहलात्तत्र । पुरलोकैरहं सह ॥ २०१ ॥

एवो हुं विचारवा लाग्यो के, जो के मने पिताए पण छांड्यो छे, तेम सर्वलोकोथी निंदित पण थयो छुं, तो पण शैलराज अने मृषावादथी आलिंगित थएलो एवो हुं दुःखी थयो नथी. ॥ १९७ ॥ १९८ ॥ वली में ते बन्नेनाज प्रभावथी पूर्वे पण सुख भोगव्युं छे; अने वली पण अनुकुल वखत आव्ये हुं सुख भोग-वीश; तेमां (कंइं) संशय नथी. ॥ १९९ ॥ हवे एम रहेतां थकां मारां घणां वर्षो व्यतीत थयां; त्यारे मारो पुण्योदय नामनो मित्र कंइं कर्या विना क्षीण थइने रह्यो ॥ २०० ॥ हवे एक दहाडो राजा घोडा खेलाववा

माटे कोइक वनमां गयो; त्यां कुतूहलथी हुं पण नगरना लोको साथे गयो ॥ २०१ ॥ पछी ते राजा त्यां थाकीने एक जगोए विसामो लेवाने बेठो; तथा पछी उठीने सामंतो सहित वननी शोभा जोवा लाग्यो. ॥ २०२ ॥ त्यां तेणे लाल अशोक वृक्षनी नीचे बेठेला, तथा धर्म देशना करता (देता) एवा (एक) विचक्षण नामना वैराग्यवत आचार्यने जोया ॥ २०३ ॥ ते आचार्यनुं अनोपम, तथा त्रणे लोकोनां चक्षुओने अमृत सरखुं रूप जोइने नरवाहन राजा हर्ष पाम्यो ॥२०४॥ तथा विचारवा लाग्यो के, यौवनरूपी वनमां फरता एवा जे आ आचार्ये कामदेवने चूर्यो छे, तेमने अहो ! संसारथी विरक्त

श्रांतस्तत्रैकदेशेऽथ। विश्रांतोऽसौ ततो नृपः॥उत्थाय लग्नो सामंता–ऽन्वितो द्रष्टुं वनश्रियम् ॥ ॥२०२॥विरक्तं तत्र सोऽपश्य–द्रक्ताशोकतलस्थितम् ॥ विचक्षणाख्यमाचार्यं। कुर्वाणं धर्म-देशनाम् ॥२०३॥ रूपं निरुपमं तस्य। त्रैलोक्यनयनामृतम् ॥ नरवाहनपृथ्वीशो। दृष्ट्वा हर्ष-मुपागतः ॥ २०४ ॥ दध्यौ चाऽनूक्तिमस्याहो। संसारोद्वेगकारणम् ॥ चूर्णितो मदनो येन। यौवनारामचारिणा ॥ २०५ ॥ गत्वा नत्वा पदांभोजं। पृच्छाम्येनं शुभाशयम् ॥ विचिंत्यैवं नृपो गत्वा। प्रणनाम गुरोः क्रमौ ॥ २०६ ॥ तेनाथ दत्तधर्माशी–र्निषण्णोऽसौ महीतले ॥ उपविष्टा यथास्थानं। प्रणम्यान्येऽपि मानवाः ॥ २०७ ॥ मया तु तादृशस्यापि। सूरेनैंव पदद्वयम्॥नत स्तब्धेन हृदये। शैलेंद्रीयविलेपनात् ॥ २०८ ॥

थवानुं शुं कारण थयु हशे !!! ॥ २०५ ॥ माटे जइने, तथा तेमना चरणकमलोने नमीने ते उत्तम आशयवाला आचार्य महाराजने हुं पूछुं; एम विचारीने, राजाए त्यां जइ गुरुना चरणोने नमस्कार कर्यो ॥ २०६ ॥ त्यारे आचार्य महाराजे तेने धर्मलाभनी आशिष आपी, त्यारे ते राजा पृथ्वीपर बेठो; अने बीजा माणसो पण (तेमने) नमीने योग्य स्थानके बेठा ॥ २०७ ॥ पण हृदयमां लगावेला शैलराज संबंधी विलेपनथी स्तब्ध थएला एवा मे तो तेवा आचार्य महाराजना पण बन्ने चरणोने

वांधाज नहीं. ॥ २०८ ॥ पछी नम्या विनाज हुं तो त्यां बेसी गयो; पछी आचार्य महाराज धर्मदेशना कहेवा लाग्या के, हे भव्यलोको ! आ संसारनो विस्तार बलतां घर सरखो छे. ॥ २०९ ॥ अने तेने ओलववामां सुख इच्छनार प्राणीए प्रयत्न करवो; अने तेनो हेतुभूत सर्वज्ञ प्रभुना आगमरूप धर्ममेघ छे. ॥ २१० ॥ ते सर्वज्ञ प्रभुना आगमो अंगीकार करवां, तथा तेने जाणनाराओने रातदहाडो सेववा; अनित्यपणुं भाववुं, तथा दुर्जनोनी अपेक्षा हृदयथी तजवी. ॥ २११ ॥ वली ते सर्वज्ञ प्रभुनी आज्ञा प्रमाणे रहेवुं; प्रणिधान बुद्धि अंगीकार करवी; साधुभक्तिथी तेनुं पोषण करवुं; तथा

निषण्णोऽनम्र एवाऽहं।सूरिर्धर्ममभाषत॥भो भव्या भवविस्तारः । प्रदीप्तगृहसन्निभः॥२०९॥ अस्य विध्यापने यत्नः। कर्तव्यः सुखमिच्छता ॥तद्धेतुर्धर्ममेघश्च । सर्वज्ञागमलक्षणः ॥ २१० ॥ तदागमोऽभ्युपेयस्त–द्विदः सेव्या दिवाऽनिशम् ॥ भावनीयमनित्यत्वं । त्याज्यापेक्षा हृदाऽसताम् ॥ २११ ॥ भाव्यमाज्ञाप्रधानेनो–पादेया प्रणिधानधीः ॥ साधुभक्त्या सा पोष्या । गोप्या प्रवचनक्षतिः ॥ २१२ ॥ विधिप्रवृत्त एतच्च । संपादयति निश्चितम् ॥ यतितव्यं विधौ तेन । पुरस्कृत्यागमं बुधैः ॥ २१३ ॥ स्वरूपं प्रत्यभिज्ञेय–मालंब्या लिंगशुद्धता ॥ सेव्यो योगश्च निर्द्वंद्वः । प्रतीकार्या कुभावना ॥२१४॥ यात्येवं यतमानानां। कर्म सोपक्रमं क्षयम् ॥ निरुपक्रमकर्मोग्रा–ऽनुबंधश्च निवर्तते ॥२१५॥ इमां गिरं गुरोः श्रुत्वा । भावं केऽपि दधुर्व्रते॥ केचन श्राद्धधर्मे च। केऽपि भद्रकतां ययुः॥ २१६ ॥

शासननी मलीनताने गोपववी. ॥ २१२ ॥ वली विधिमां प्रवृत्त थएलो प्राणी ते (सघलुं) निश्चयें करीने मेलवे छे; माटे पंडितोए आगमने अगाडी करीने विधिमां प्रयत्न करवो. ॥ २१३ ॥ वली आत्मस्वरूपने जाणवुं; लिंगशुद्धिनुं आलंबन लेवुं; निर्द्वंद्व योगने सेववो, तथा कुभावनानो त्याग करवो ॥ २१४ ॥ एवी रीते प्रयत्न करता प्राणीओनुं सोपक्रम कर्म क्षय पामे छे; तथा निरुपक्रम कर्मोनो भयंकर अनुबंध निवर्ते छे. ॥ २१५ ॥ आचार्य महाराजनी ते वाणी सांभलीने केटलाकोए तो दीक्षामां

तथा केटलाकोए श्रावक धर्ममां भाव धारण कर्यो; तथा केटलाको तो भद्रपणाने पाम्या ॥ २१६ ॥ एटलामां (मारा) पिताजीए विचार्युं के, मारा हृदयमां रहेलो (संशय) हुं (आचार्य महाराजने) पूछुं तेथी कपालपर राखेल छे, हस्त संपूट जेणे एवा ते मारा पिताजी पूछवा लाग्या के, ॥ २१७ ॥ हे भगवन् ! आपनुं रूप तो निरुपम छे; तथा आपनुं भाग्य पण सौभाग्यवालुं छे; तो आपने वैराग्यनुं कारण शुं थयुं छे? ॥ २१८ ॥ त्यारे आचार्य महाराजे कह्युं के, हे राजन्! जो तने कौतुक छे, तो मारा संसार संबंधि वैराग्यनो हेतु तने हुं कहुं छुं ॥ २१९ ॥ "आत्मस्तुति, परनी निन्दा, तथा प्राक्क्रीडावार्ता" एवी

दध्यावत्रांतरे तातो।हृज्ञतं प्रश्नयाम्यहम् ॥ पप्रच्छाऽसौ ततो न्नाल–विन्यस्तकरकुड्मलः ॥२१७॥
रूपमप्रतिरूपं ते । न्नाग्यं सौन्नाग्यसंगतम्॥न्नदंत न्नवतो जातं । तत्किं वैराग्यकारणम्॥२१८॥
सूरिर्बिन्नापे चेद्राज–न्नस्त्यत्र तव कौतुकम् ॥ न्नववैराग्यहेतुं मे । तदा ते कथयाम्यहम्
॥ २१९ ॥ स्वस्तुतिः परनिंदा प्राक्क्रीमावार्तेति च त्रयम् ॥ स्वचरित्रे ध्रुवं तच्च । वक्तुं युक्तं
न मे परम् ॥ २२० ॥ तातेनोक्तं कथयता । त्वयेत्थं नाथ कौतुकम् ॥ वर्धितं मे प्रसादेन ।
तद्वाच्यं चरितं निजम् ॥ २२१ ॥ निर्बंधं बोधहेतुं च । ज्ञात्वा सूरिस्ततोऽवदत् ॥ अस्तीह
न्नूतलं नाम । नगरं हि मनोहरम् ॥ २२२ ॥ तत्राऽतुलप्रतापाज्ञो । न्नूपोऽस्ति मलसंचयः
तत्प्रिया मलपंक्तिश्च । शुन्नाशुन्नविधौ विधिः ॥ २२३ ॥

रीतनी त्रण वस्तुओ मारां चरित्रमां छे,अने ते खरेखर कहेवाने युक्त छे, पण बीजुं कहेवानुं नथी ॥२२०॥ त्यारे पिताजीए कह्युं के, हे नाथ ! आम कहेतां थकां तो आपे मारां कौतुकनी वृद्धि करी; माटे (हवे) कृपा करीने ते आपनुं चरित्र मने कहेवुं ॥ २२१ ॥ पछी आचार्य महाराजे (तेमनो) आग्रह अने बोधनो हेतु जाणीने कह्युं के, अहीं भूतल नामनुं मनोहर नगर छे ॥ २२२ ॥ ते नगरमां अतुल्य प्रताप अने आज्ञावालो "मलसंचय" नामनो राजा छे; तथा तेने, शुभ तथा अशुभनी विधिमां ब्रह्मा सरखी

"मलपंक्ति" नामनी स्त्री छे. ॥ २२३ ॥ तेओने, जगतने हर्ष करनारो एक तो "शुभोदय" नामनो पुत्र छे; अने बीजो जगतने संताप करनारो "अशुभोदय" नामनो पुत्र छे. ॥ २२४ ॥ ते शुभोदयने लोकोने सुख आपनारी "चारुता" नामे स्त्री छे. अने अशुभोदयने भय करनारी "अचारुता" नामे स्त्री छे.॥२२५॥ हवे ते शुभोदय तथा चारुताने "विचक्षण" नामे पुत्र थयो; तथा अशुभोदय अने अचारुताने, गुणोना समूह विनानो "जड" नामे पुत्र थयो. ॥ २२६ ॥ हवे त्यां "विचक्षण" छे ते, गंभीर, शांत, दांत, गुरुजनोनी भक्ति करनारो, देवसेवामां तत्पर, दानेश्वरी, गुणदोषना तफावतने जाणनारो,

पुत्रोऽस्ति जगदाह्लादी । तयोरेकः शुभोदयः ॥ अन्योऽशुभोदयो नाम । जगत्संतापकारकः ॥ ॥ २२४ ॥ भार्या शुभोदयस्यास्ति । चारुता जनशर्मदा ॥ अचारुताख्या त्वशुभो-दयस्य जनभीतिकृत् ॥ २२५ ॥ विचक्षणोऽजनि शुभो-दयचारुतयोः सुतः ॥ अन्ययोस्तु जडो नाम । गुणग्रामपराङ्मुखः॥२२६॥ अक्षुद्रः प्रशमी दांतः । पूजको गुरुसंततेः ॥ देवसेवापरो दाता । गुणदोषविशेषवित् ॥ २२७ ॥ लक्ष्मीलाभेऽप्यनुत्सेको । व्यसनेऽप्यविषादवान् ॥ परनिंदानिजश्लाघा-रहितः परकार्यकृत् ॥ २२८ ॥ मध्यस्थः सत्यवादी च । विनीतो नतवत्सलः ॥ मार्गानुसारी मतिमान् । जातस्तत्र विचक्षणः ॥२२९॥ त्रिभिर्विशेषकम् ॥ जडस्त्वभूद्विपर्यस्त-स्वांतः पैशुन्यभाजनम् ॥ सत्यसंयमसंतोष-शौचसंस्कारवर्जितः ॥ २३० ॥ प्रतिज्ञास्खलितो देव-गुरुनिंदाविधायकः ॥ क्षुद्रो लोभरतिर्दीनः । सुहृदां चित्तभेदकृत्॥२३१॥

धनना लाभमां पण उत्सेक विनानो, दुःख आवते छते खेद नहीं धरनारो, परनिंदा तथा आत्मप्रशंसा विनानो, परनुं कार्य करनारो, मध्यस्थ, सत्य बोलनारो, विनयी, नमेलाओप्रते स्नेह राखनारो, बुद्धिवान तथा (एवी रीते) ते मार्गानुसारी (अर्थात् समकीती) थयो हतो ॥२२७॥२२८॥२२९॥ अने "जड" तो तेथी विपरीत मनवालो, चुगलीना भाजनरूप, तथा सत्य, संयम, संतोष, तथा पवित्रताना संस्कारविनानो, प्रतिज्ञा नहीं पालनारो, देवगुरुनी निंदा करनारो, हलकट (तोछडो)

लोभमां आसक्त, कंगाल, मित्रोना मनने भेदनारो, वचनक्रियामां भेदवालो (अर्थात् बोले कइ
अने करे कइ तेवो), परना दुःखमां आनंदित थनारो, परनी संपदामां थएलां छे दुःख जेने एवो (अर्था-
त् परनुं धन देखी ईर्षा करनारो), अहंकारथी धमधमी रहेलो तथा निष्फल क्रियावालो हतो ॥२३०॥
॥ २३१ ॥ २३२ ॥ एवी रीतनां लक्षणवाला एवा तेओ बन्ने विचक्षण अने जड, पोताना घरमां
सुखथी लालन करता थका तारुण्यपणाथी उल्लसायमान थएली दशाने प्राप्त थया ॥ २३३ ॥ हवे
गुणोरूपी रत्नोनां समूहथी भरेल छे बजारनी श्रेणिओ जेमां, तथा कल्याणना स्थानक सरखुं

भिन्नो वाचि क्रियायां च । जातानंदः परापदि ॥ परसंपदि जातार्ति । गर्वाध्मातोऽफल-
क्रियः ॥ त्रिभिर्विशेषकम् ॥ २३२ ॥ ईदृग्लक्षणयुक्तौ तौ । स्वगृहे सुखलालितौ ॥ विचक्ष-
णजडौ प्राप्तौ । तारुण्योल्लसितां दशाम् ॥ २३३ ॥ इतश्च गुणरत्नौघ–पूर्णपण्यापणावलि॥
पुरं विमलचित्ताख्य–मस्ति स्वस्तिनिकेतनम् ॥ २३४ ॥ जयत्यनंतगुणभू–र्नृपस्तत्र मलक्ष-
य. । कषायतनुताकोशा–दक्षयो जनितोदयः ॥ २३५ ॥ तस्य चास्ति महादेवी । शुभल-
ब्धिरनित्वरी ॥ गुणैर्जयंती जगती । चतुरंभोधिमेखलाम् ॥ २३६ ॥ जाता ताभ्यां शुचिः
कन्या । बुद्धिर्वंशविवर्द्धनी ॥ चांद्री कलेव जगतां । नयनानंददायिनी ॥ २३७ ॥ विचिंत्य त-
द्विवाहार्हं । गुणपूर्णं विचक्षणम् ॥ नवयौवना सा प्रहिता । ताभ्यां तस्य स्वयंवरा ॥ २३८ ॥

" विमलचित्त " नामनुं (एक) नगर छे ॥ २३४ ॥ ते नगरमां अनंत गुणोनां स्थानकरूप, तथा
कषायोनी अल्पतारूपी भंडारथी अक्षय, तथा उत्पन्न करेला छे उदय जेणे एवो " मलक्षय " नामे
राजा जय पामे छे ॥ २३५ ॥ ते राजाने शीलवती, तथा गुणोथी, चार समुद्रोनी मेखलावाली पृथ्वीने
जीतनारी शुभलब्धि नामे पटराणी छे ॥ २३६ ॥ तेओने पवित्र, वंशने वधारनारी, तथा चंद्रनी कलानी
पेठे जगतना चक्षुओने आनंद आपनारी बुद्धि नामनी पुत्री थइ ॥ २३७ ॥ हवे ते विचक्षणने तेणीनी
साथे विवाह करवाने लायक, तथा गुणोथी भरेलो जाणीने तेओए ते युवान स्वयंवराने (बुद्धिने) तेनी-

पासे मोकली. ॥ २३८ ॥ पछी विचक्षण ते कन्याने महोत्सव पूर्वक परण्यो; अने एवी रीते तेणीनी साथे भोग भोगवतां थकां तेना दिवसो जाय छे. ॥ २३९ ॥ हवे एक दहाडो स्नेहना महासागर सरखा मलक्षय राजाए (पोतानी पुत्री) बुद्धिनो समाचार मेलववाने पोतानां पुत्र विमर्शने (त्यां) मोकल्यो. ॥ २४० ॥ हवे स्नेहथी बंधाएलो एवो ते विमर्श ते पोतानी बेहेन पासेज रह्यो; हवे संपूर्ण डोहलावाली ते गर्भिणी थएली बुद्धिए "प्रकर्ष" नामना पुत्रने जन्म आप्यो. ॥ २४१ ॥ प्रशंसवा लायक, तथा प्रख्यात छे महिमा जेनो, अने गुणोथी विचक्षण सरखो एवो ते बुद्धिनो पुत्र विमर्शने अत्यंत वहालो थइ पड्यो. ॥ २४२ ॥

विचक्षणेन सा कन्या । परिणीता महोत्सवैः ॥ यांत्यस्य दिवसा भोगान् । भुंजानस्य तया सह ॥ २३९ ॥ वार्तामथान्यदा लब्धुं । बुद्धेः स्नेहमहोदधिः ॥ विमर्शाख्यं निजं पुत्रं । प्रजिघाय मलक्षयः ॥ २४० ॥ भगिन्याः प्रेमबद्धोऽसौ । तस्या एवांतिके स्थितः ॥ पूर्णाकांक्षा जातगर्भा । प्रकर्षं सुषुवेऽथ सा ॥२४१॥ श्लाघ्यो विख्यातमहिमा । जातोऽसौ बुद्धिनंदनः॥विमर्शस्य प्रियः कामं।विचक्षणगुणैःसमः॥२४२॥अथान्यदा वनं स्वीयं।दृष्ट्वा वदनकोटरम् विचक्षणजडौ तत्र। स्थितौ लीलापरौ सुखम् ॥ २४३ ॥ दृष्टं महाबिलं ताभ्यां।तत्र तस्माच्च निर्यती ॥ रक्तवर्णांगना दृष्टा । लीलाकृष्टजगन्मनाः ॥ २४४ ॥ तामुद्वीक्ष्य जडश्चित्ते । ममौ नानंदपूरतः ॥ दध्यौ च नेदृशी काचि–दस्ति विश्वत्रयेंऽगना ॥ २४५ ॥ धात्रा मदर्थमेवैषा व्यधायि यदियं मुहुः ॥ मा लोला प्रेक्षते तेन । गत्वैनां स्वीकरोम्यहम् ॥ २४६ ॥

हवे एक दहाडो पोताना "वदनकोटर" (मुखरूप) वनने जोइने, त्यां विचक्षण अने जड क्रीडामां तत्पर थया थका सुखेथी रह्या. ॥ २४३ ॥ ते वनमां तेओए (एक) मोटुं कोतर जोयुं; तथा तेमांथी निकलती, अने लीलामात्रथी खेंचेल छे जगतनुं मन जेणीए, एवी लाल रंगनी (एक) स्त्रीने (जीभने) तेओए त्यां दिठ. ॥२४४॥ तेणीने जोइने जड तो हर्षना पूरथी चित्तमां पण मावा न लाग्यो, अने विचारवा लाग्यो के, अहो आ जगतमां पण कोइ नथी. ॥ २४५ ॥ वली आ जीभरूपी

स्त्रीने ब्रह्माए मारे माटेज बनावी लागे छे, केमके, ते वारवार मारी सामुं जुए छे; माटे हवे जइने तेणीने हुं मारी करी लेउं ॥ २४६ ॥ हवे उत्तम एवो ते विचक्षण तो ते जीभने वनमां एकली जोइने चलित चित्तवालो न थयो, पण नीची दृष्टि करीने रह्यो ॥ २४७ ॥ ते जीभ्हाना दर्शनने नुकशानकारक, तथा मनने खेद उपजावनारु जाणतो थको ते विचक्षण जडने खेंचीने त्यांथी बीजी जगोए जवा लाग्यो ॥ २४८ ॥ पछी जेटलामां तेओ थोडुंक चाल्या तेटलामां ते जीभनी दासी आवीने केहेवा लागी के, तमारे मारु वचन सांभलवु जोइए ॥ २४९ ॥ तमो मारी शेठाणीने

विचक्षणस्तु तां दृष्ट्वा । लोलामेकाकिनीं वने॥न दोलायितचित्तोऽभूत् । स्थितो न्यग्दृष्टिरुत्तमः ॥२४७॥प्रवृत्तो गंतुमन्यत्र । जडमाकृष्य सोऽग्रतः॥मन्वानोऽपायभूतं त–दर्शनं चित्तविप्लवम् ॥ २४८ ॥ यावत्तौ गच्छतः स्तोकं । भूत्वागं तावदागता ॥ तच्चेटी सा जगौ श्रव्यं । भवद्भ्यां वचनं मम ॥ २४९ ॥ मत्स्वामिनीं विमुच्येह । चलितौ यद्युवां जवात् ॥ तेनैषा प्रसरन्मूर्छा म्रियते वां वियोगतः ॥ २५० ॥ युवाभ्यां तत्समागत्य । सा स्वस्था क्रियतां ततः ॥ एतत्स्वरूपमखिलं । कथयिष्याम्यनाकुला ॥ २५१ ॥ विचक्षणं जडोऽवादीद्–भ्रातस्तत्रोपगम्यताम् स दध्यौ सुंदरं नेदं । नूनमेषा प्रतारिका ॥ २५२ ॥ अप्रमत्तोऽथवा यामि । प्रमत्तो हि वलं व्रजेत् ॥ स्वीकृत्येत्येष तद्वाक्यं । तद्युक्तोऽगात्तदंतिकम् ॥ २५३ ॥

अहीं छोडीने जे वेगथी चाल्या गया, तेथी तमारा वियोगथी ते मूर्छित थइने मृत्यु पामे छे ॥ २५० ॥ माटे तमो त्यां आवीने तेणीने शांत करो? तथा पछी स्वस्थ थइने हुं तेनुं सघलु स्वरूप कहीश ॥ २५१ ॥ त्यारे जडे विचक्षणने कह्यु के, हे भाइ! चालो त्यां जइए; त्यारे विचक्षणे विचार्यु के, त्या जवु सारुं नथी, अने खरेखर आ ठगनारी छे ॥ २५२ ॥ अथवा सावधान थइने हु त्यां जउं, केमके, गाफल माणस छलनो भोग थइ पडे; एवी रीते तेनु वचन स्वीकारीने तेनी साथे ते तेणीनी पासे गयो ॥ २५३ ॥

हवे ते स्त्री शांत थइ; पछी जडे ते दासीने पूछ्युं के, आनुं नाम शुं छे? त्यारे तेणीए कह्युं के, ते मारी शेठाणीनुं "रसना" (जीभ) नाम छे. ॥ २५४ ॥ पछी जडे पूछ्युं के, तारुं नाम शुं? त्यारे तेणीए कह्युं के, हे देव! मारुं नाम लोलता छे; तुं शुं विसरी गयो? तें तो मने सारी रीते सेवेली छे. ॥ २५५ ॥ कर्मपरिणाम राजाना भोगवटावाला अव्यवहारराशि नामना नगरमां तमारी घणां कालथी स्थिति हती ॥ २५६ ॥ पछी त्यांथी ते राजानी आज्ञाथी तमो एकेंद्रियवास नामना नगरमां आव्या; तथा

स्वस्थीभूताऽथ सायोषि—दपृच्छच्चेटिकां जडः॥अस्याः किं नाम सा प्राह।स्वामिनी रसनाऽभिधा ॥२५४॥किंनामिका त्वमित्युक्ते।जडे नाथ जगाद सा॥देवाऽहं लोलताभिख्या।विस्मृता संस्तुताऽपिकिम् ॥ २५५ ॥ महाभुक्तौ चिरं कर्म—परिणाममहीभुजः ॥ नगरेऽव्यवहाराख्ये । बभूव भवतोः स्थितिः ॥ २५६ ॥ एकाक्षवासनगरे । तदादेशात्ततो युवाम् ॥ आगतौ विकलाक्षाणां । निवासे तदनंतरम् ॥ २५७ ॥ वसंति तत्र प्रथमे । पाटके द्वींद्रिया जनाः ॥ तन्मध्ये युवयोर्दत्तं । राज्ञा वदनकोटरम् ॥ २५८ ॥ सदा स्वाभाविकं चेदं । विद्यतेऽत्र महाबिलम् ॥ युष्मदर्थं कृता चात्र । वेधसा स्वामिनी मम ॥ २५९ ॥ ततः प्रभृति चैषा मे । स्वामिनी सहिता मया ॥ युवाभ्यां सह सर्वत्राविललास रसाद्भुता ॥ २६० ॥ विकलाक्षे च पंचाक्षे । भवतोर्विरहाऽसहा ॥ यदियं तेन भवतो—श्चिरं परिचितास्म्यहम् ॥ २६१ ॥

पछी विकलेंद्रियना निवासमां आव्या. ॥ २५७ ॥ त्यां पेहेला पाडामां बे इंद्रिय जीवो रहे छे; त्यां तमोने राजाए वदनकोटर "मुख" आप्युं हतुं. ॥ २५८ ॥ तेमां हमेशां स्वभावथी उत्पन्न थएलुं आ मोटुं बिल छे; अने तेमां ब्रह्माए तमारे माटे मारी शेठाणीने बनावेली छे. ॥ २५९ ॥ अने त्यारथी मारी आ रसे करीने अद्भुत एवी शेठाणीए हुं सहित सर्व जगाए तमारी साथे विलास कर्यो छे. ॥ २६० ॥ एवी रीते विकलेंद्रिय अने पंचेंद्रियमां तमारा विरहने अमोए सहन कर्यो नथी, अने तेथी आ मारी

॥१३५॥

॥ २६१ ॥ एवी रीतनी, मनरूपी शेठाणी जीभ, अने हु घणां कालथी तमारा परिचयवालीओ छीए ॥ २६१ ॥ एवी रीतनी, मनरूपी बालकने (भोलववामां) शाकिनी सरखी लोलतानी वाणी सांभलीने, जडे विचार्यु के, हु तो कृतार्थ थयो, केमके, मारो विचार तो पार पड्यो ॥ २६२ ॥ हवे एवी रीतनी लोलतानी वाणीथी छलित थएलो जड ते रमनाने स्वीकारीने हमेशा मध, मदिरा तथा मांस आदिकथी तेने लाड लडाववा लाग्यो ॥ २६३ ॥ हवे ते जड, पेयाऽपेयनी बुद्धि विनानो तथा भक्ष्याऽभक्ष्यना तफावतने नही जाणतो थको शींगडा पुछडां विनाना पशु सरखो थयो. ॥ २६४ ॥ हवे ते रसनाने लाड लडावतां थकां जे

श्रुत्वैनां लोलतावाचं। चित्तबालकशाकिनीम् ॥ जडो दध्यौ कृतार्थोऽहं। संपन्नं मद्विकल्पितम्॥ ॥२६१॥ छलितो लोलतावाक्या—जडोऽथ रसनां सदा ॥ स्वीकृत्य लालयामास। मधुमद्यप-लादिभिः ॥ २६२ ॥ पेयाऽपेयधियाशून्यो। भक्ष्याऽभक्ष्याऽविशेषवित् ॥ शृंगपुच्छपरिभ्रष्टो। जातः सोऽथ पशुर्जडः ॥ २६४ ॥ यदूनं रसनां तस्य। भवेल्लालयतः क्वचित् ॥ तत्सर्वं रसना प्राह। रसग्रसनराक्षसी ॥ २६५ ॥ धर्मार्थकाममोक्षेभ्यो। विमुखो रसनावशः ॥ दुःकर्म-निरतो लौकै—र्गर्हितो बहुशो जडः ॥ २६६ ॥ विचक्षणस्तु न क्षुब्धः। श्रुत्वा तां लोलता-गिरम् ॥ विधिसृष्टिध्वनेरर्थं। कर्मसृष्टिं विचारयन् ॥ २६७ ॥ दध्यौ मध्यस्थधीश्चैव। मत्स्त्रे वेयं ममांगना ॥ यदास्यकोटरे सृष्टा। पोष्या नैवाऽपरीक्ष्य तु ॥ २६८ ॥

कइ ओछु रहेतु, ते सघलु रसभक्षणमा राक्षसी सरखी रसना तेने कहेती हती ॥ २६५ ॥ हवे धर्म, अर्थ, काम अने मोक्षथी विमुख थएलो, तथा रसनाने वश थएलो, अने दुराचारमां रक्त थएलो ते जड, लोकोथी अत्यत निंदावा लाग्यो ॥२६६॥ तथा विचक्षण तो ब्रह्मानी बनावटनी ध्वनिना अर्थने कर्मनी सृष्टि विचारतो थको, लोलतानी ते वाणी सांभलीने क्षोभ पाम्यो नहीं ॥२६७॥ वली मध्यम बुद्धिवालो थइने ते विचारवा लाग्यो के, मुखरूपी कोटरमां उत्पन्न थएली एवी आ रसना (जीभ) जोके मारी स्त्री तो छे ज, तो

पण तेनी परीक्षा कर्या विना मारे तेने पोषवी नहीं. ॥२६८॥ जे जड माणस तत्वने नहीं जाणीने स्त्रीना वचनथीज वर्ते छे, ते खरेखर नदीकिनारे (उगेला) वृक्षनी पेठे पटकी पडे छे. ॥ २६९ ॥ माटे लोकाचारथी तेने पालवी, पण तेने लाड लडाववां नहीं, एम विचारि तेणीमां आदर रहित थइने तेणीने किंचित् भोजनरस ते देवा लाग्यो. ॥ २७० ॥ एवी रीते शुभमार्गथी रसनानुं अनुवर्तन करतां थकां, तथा लोलताने जीततां थकां तेने त्रणे वर्गनी लक्ष्मी प्राप्त थइ.॥२७१॥हवे एक दहाडो संतुष्ट चित्तवाला एवा ते जडे (पोतानी) अचारुता नामनी माताने तथा अशुभोदय नामना पिताने (पोताने थएलो) रसनानो लाभ जणाव्यो.॥२७२॥

स्त्रीवाचैव जडस्तत्व–मज्ञात्वा यः प्रवर्तते॥नदीतीरस्थतरुव–त्स पतत्येव निश्चितम् ॥२६९॥
लोकानुवृत्त्या तत्पाल्या। न तु लाल्येत्यसावधा॥रसनाया ददौ खाद्य–रसं किंचिदनादृतः॥२७०॥
अनुवर्तयतश्चेत्थं । रसनां शुभवर्त्मना॥ लोलतां त्यजतस्तस्य । त्रिवर्गश्रीरुपस्थिता ॥ २७१ ॥
ज्ञापिता रसनालाभं । जडेनाऽचारुताऽन्यदा॥माता संतुष्टचित्तेन । जनकश्चाऽशुभोदयः॥२७२॥
तावप्यथाहतुस्तस्य । सुधावृष्टिसमं वचः ॥ पुण्येनेयं त्वया लब्धा । लाल्यते चेतिशोभनम् ॥ २७३ ॥ ईष्टं पित्रुपदिष्टं चे–त्यतिलुब्धोऽजनिष्ट सः॥ एकं हि स्वैरिणी योषाऽन्यच्चकोकिलकूजितम् ॥ २७४ ॥ शुभोदयः पिता स्वीयो । जननी चारुता तथा ॥ इतो विचक्षणेनाऽपि ज्ञापितौ रसनागतिम् ॥ २७५ ॥ बुद्धिस्तथा प्रकर्षश्च । विमर्शश्चेत्यमी त्रयः॥ ज्ञापिता रसनाप्राप्तिं । कुटुंबं मिलितं च तत् ॥ २७६ ॥

त्यारे तेओए पण तेने अमृतवृष्टि सरखुं वचन कह्युं के, पुण्यथी मलेली एवी आ रसनानुं तुं जे लालन करे छे, ते काम बहु सारुं छे. ॥ २७३ ॥आ कार्य ते जडने वहालुं तो हतुंज, अने वली मातपिताए तेमां सम्मति आपी, तेथी ते जड तेमां अत्यंत लुब्ध थयो; अने ते एकतो स्वेच्छाचारी स्त्री अने वली तेमां कोयलोना टहुका, तेना जेवुं थयुं. ॥ २७४ ॥ हवे विचक्षणे पण पोताना पिता शुभोदयने तथा चारुता नामनी माताने, ते रसनानो हेवाल विदित कर्यो. ॥ २७५ ॥ वली तेणे बुद्धि, प्रकर्ष, तथा विमर्श ए त्रणे-

ने, तथा मलेलां कुटुंबने पण ते रसनानी प्राप्तिथी वाकेफ कर्या ॥ २७६ ॥ पछी शुभोदये कह्यु के, हे वत्स ! तु तो तत्वनो जाणकार छे, तो पण तारे ते रसनानो कोइ पण वखते विश्वास करवो नहीं ॥ २७७ ॥ वली (आ जगतमा) सर्व स्त्रीओ प्राये करीने पवनसरखी चचल, तथा संध्याकालना मेघपटलनी पेठे क्षणमां रक्त अने क्षणमां विरक्त, तथा पाणीमां रहेला चद्रना (प्रतिबिंबनी पेठे), कबजामां न आवे तेवी, नदीनी पेठे नीचे (नीचप्रते) गमन करनारी, (पुरुषनी) दृष्टिने बांधवामां इंद्रजाल सरखी, लतारूपी सर्पना करडिआ सरखी, साक्षात् गुफाविनानी वाघण सरखी, पृथ्वीपर

ततः शुभोदयः प्राह।वत्स त्वमसि तत्ववित् ॥ तथाऽप्यस्या न विश्वासः । कर्तव्यो भवता क्वचित्॥ २७७ ॥ नारी तावत्समस्ताऽपि । प्रायः पवनचंचला ॥ क्षणं रक्ता विरक्ता च । संध्याभ्रपटलोपमा ॥ २७८ ॥ दुर्गमा वारिविधुव-न्नदीवन्नीचगामिनी ॥ दृष्टिबंधेंद्रजालाभा । कौटिल्याऽहिकरंडिका ॥ २७९ ॥ साक्षादकंदरा व्याघ्री । विषवल्लिरभूमिजा ॥ अनिंधनाऽनलज्वाला । विद्युदस्तनयित्नुजा ॥ २८० ॥ एषा त्वेका वनचरी । रसना लोलतान्विता ॥ अतिगूढचरित्रा मे भाति नैव तवोचिता ॥ २८१ ॥चतुर्भिः कलापकम्॥न ज्ञायते कुतस्त्येयं । केनेह प्रेषिताऽथवा ॥ मूलशुद्धिस्त्वया कार्या । तदस्याः संगमिच्छता ॥ ॥ २८२ ॥ यतः—अप्रमादपरोऽप्युच्चे-र्मूलशुद्धेरकारकः॥पुमान् प्रयाति निधनं । स्त्रीणां हृदयमर्पयन् ॥ २८३ ॥

नहीं उगेली झेरी वेलडी सरखी, बलतण विनानी अग्निनी ज्वाला सरखी, तथा मेघविना उत्पन्न थएली वीजली सरखी होय छे, तेमां पण लोलता सहित एकाकी वनमां विचरनारी (राक्षसी सरखी) आ रसना (जीभ) तो मने अत्यत गूढ चरित्रवाली लागे छे; माटे ते तने योग्य नथी ॥ २७८ ॥ २७९ ॥ ॥ २८० ॥ २८१ ॥ वली आने अहीं क्यांथी अने कोणे मोकली ? ते पण जणातु नथी; माटे तेणीना संगने इच्छता एवा तारे आना मूलनी तापस करवी ॥२८२॥ यत —कह्यु छे के, केम के, सावधान रहेलो माणस पण उचे प्रकारे मूलनी तपास नहीं करतो थको, तथा स्त्रीने (पोतानु) हृदय अर्पण करतो

थको नाशने प्राप्त थाय छे. ॥ २८३ ॥ पछी चारुताए पण कह्युं के, हे वत्स! तारा पिताए ते विचार उत्तम जणाव्यो छे; वली बुद्धि आदिकोए पण एमज कह्युं; पछी विचक्षण पण ते स्वीकारीने कहेवा लाग्यो के, ॥ २८४ ॥ हवे ते रसनाना मूलनी तपास माटे कोने मोकलवो लायक छे? एवी रीते तेणे पुछवाथी तेना पिताजीए विमर्शने (ते काम माटे) उचित जणाव्यो. ॥ २८५ ॥ यतः–कह्युं छे के, केमके, आ जगतमां विमर्शज (विचारज) तत्व अने अतत्वने जुदां करनारो छे; केमके, हंसविना क्षीरनीरनुं विवेचन कोण करे छे.? ॥ २८६ ॥ समर्थ माणस पण (पक्षे–महादेव पण) विमर्श विनानो (विचार विनानो)

चारुताऽप्याह वत्सेदं । पित्रा ते साधु मंत्रितम्॥ ऋचुर्बुद्ध्यादयोऽपीत्थं । तथेत्याह विचक्षणः ॥ ३०४ ॥ रसनामूलशुद्ध्यर्थ–मथ कः प्रेषणोचितः॥इतिपृष्टोऽमुना तातो॥विमर्शं तादृशं जगौ ॥ ३०५ ॥ यतः--विमर्श एव लोकेऽस्मिन्--स्तत्वाऽतत्वैकशोषकृत् ॥ कुरुते को विना हंसं । क्षीरनीरविवेचनम् ॥ ३०६ ॥ ईश्वरोऽप्यविमर्शः सन् । बध्नाति गरलं गले ॥ सविमर्शं तु पुरुषो–त्तमं श्रीर्वृणुते स्वतः ॥ ३०७ ॥ विचक्षणोऽथ निश्चित्य । विमर्शं प्रेषणोचितम् ॥ आज्ञप्तवान् प्रहातुं तं । कृत्वा संवत्सरावधिम् ॥ ३०८ ॥ पितामहं च पितरं । प्रकर्षोऽथ व्यजिज्ञपत् ॥ विनाविमर्शं न स्थातुं । शक्नोमि क्षणमप्यहम् ॥ ३०९ ॥ मामेनमनुगंतुं त–दनुजानीत सांप्रतम् ॥ तदाकर्ण्योल्लसत्प्रेमा–ऽपश्यत्तातं विचक्षणः ॥ ३१० ॥

थयो थको गलामां झेरने बांधे छे; अने विमर्शवाला (विचार वाला) एवा उत्तम पुरुषने (पक्षे–विष्णुने) लक्ष्मी पोतानी मेलेज वरी छे. ॥ २८७ ॥ हवे विचक्षणे विमर्शने त्यां मोकलवाने लायक जाणीने, तेने त्यां जवाने, एक वर्षनी मुदत आपीने हुकम कर्यो. ॥२८८॥ हवे प्रकर्ष (पोताना) दादाने तथा पिताने विनती करी के, विमर्श विना हुं क्षणवार पण रही शकुं तेम नथी. ॥ २८९ ॥ माटे मने पण आ वखते तेनी साथे जवानी आज्ञा आपो? ते सांभलीने उल्लसायमान प्रितिवाला विचक्षणे पिताजी सामुं जोयुं.

॥ २९० ॥ त्यारे शुभोदये पण कह्यु के, तेने आ विनय (करवो) लायक छे, अने ताराथी तथा बुद्धिथी उत्पन्न थएला एवा आ प्रकर्षमां जे गुणोनी संपदा छे, तेमां आश्चर्य नथी ॥ २९१ ॥ वली आ तारी बुद्धि नामनी स्त्री नीतिवान छतां अनीतिवाली छे; (विरोधना परिहारपक्षे–अनीति एटले दुष्काल आदिक भय विनानी छे) तेम विशाल दृष्टिवाली छतां सूक्ष्म दृष्टिवाली प्रसिद्ध छे; (विरोधना परिहार पक्षे–सूक्ष्म बाबतोमां पण नजर राखनारी छे) ॥ २९२ ॥ वली लोकोत्तर चरित्र-वाली एवी आ बुद्धि तारी कीर्तिना समूहने वधारनारी छे; तथा ते शोक्यपणाना भावथी भये

शुभोदयोऽप्यभिदधे । विनयोऽस्यैष युज्यते॥तव बुद्धेश्च जातेऽस्मिन्। किं चित्रं गुणसंपदाम् ॥
॥ २९१ ॥ इयं भार्या हि ते बुद्धि–रनीतिर्नीतिभागपि ॥ विशालदृष्टिरप्येषा । सूक्ष्मदृष्टिः
प्रकीर्तिता ॥ २९२ ॥ लोकोत्तरचरित्रेयं । त्वत्कीर्तिस्तोमवर्धनी ॥ निषिध्यते भियैवैत–द्रसा-
पत्न्याद्रसनादरः ॥ २९३ ॥ अनंतगुण एवास्याः । प्रकर्षोऽप्यात्मजस्ततः ॥ अनुमातुलमा-
ज्ञप्यः । प्रस्थातुं नाऽत्र काऽपि भीः ॥ २९४ ॥ विचक्षणो ददावाज्ञा–मथ तातं प्रमाणयन् ॥
गंतुं च तौ प्रवृत्तौ द्वौ । तदा चाऽस्ति शरद्भरः ॥ २९५ ॥ सकलहं कलहंसकलस्वनै । र्विनि-
हतध्वनिसुंदरता मदे ॥ कलयति श्रियमाप्य घनात्ययं । घनकला न कलापिततिस्तदा॥२९६॥

करीनेज (तारो) रसना प्रतेनो आदर निषेधे छे ॥ २९३ ॥ वली तेणीनो पुत्र आ प्रकर्ष पण अनत गुणोवालो छे, माटे तेने (तेना) मामानी साथे जवानी आज्ञा आपवी; तेमां कइ डर नथी ॥ २९४ ॥ हवे पिताजीनां वचनने प्रमाण गणीने विचक्षणे तेने पण साथे जवानी आज्ञा आपी; पछी तेओ बन्ने चालवा लाग्या; हवे ते समये त्यां शरद ऋतु हती ॥ २९५ ॥ ते वखते कलहयुक्त थएला राजहंसोना मनोहर शब्दोथी हणाएल छे ध्वनिनी सुंदरता जेनी, तथा वरसादमां मनोहर एवी मयूरोनी श्रेणि,

वरसादना नाशने पामीने मदमां शोभाने धारण करती नथी. ॥ २९६ ॥ जे तलावडी कलहंसोना निषेध पूर्वक मलिन मेघोए करेला कलुषितपणाने प्राप्त थइ हती, ते तलावडीने शरद ऋतुए, ते हंसोने लावीने उल्लसायमान बिसतंतुओरुपी दांतोवाली अने निर्मल बनावी. ॥ २९७ ॥ (वली ते समये) सारी रीते कमलिनीनी मनोहर शोभाना उत्सवना दर्शनमां उत्सुक थएला तथा गुप्त रहेलां, अने विस्तार पामेलां, तथा विस्मित थएलां छे कमल सरखां लोचनो जेना एवा कया रसीया माणसने तलावमां रहेलुं कमल विनोद न पमाडे ? ॥ २९८ ॥ (वली ते समये) अहीं पोतानी कांतिने नाश

मलिनमेघकृतां खलु या ययौ । कलुषतां कलहंसनिषेधतः ॥इयमिमानुपनीय कृता लस–द्बिशरदा शरदा सरसी शुचिः॥२९७॥कमलिनीकलमोत्सवदर्शनो–त्सुकमलं कमलं रहसि स्थितम्॥विततविस्मितपंकजलोचनं।सरसि कं रसिकं न विनोदयेत् ॥२९८॥ अपरसं परसंभ्रमकार्यभू-न्निजरुचिर्निदिहाभ्रकुलं यतः॥सुविलसन् सह निर्मलया निशा।विधुरितो धुरितोषवतामभूत् ॥ २९९ ॥ कलमगोपिकया पिकयाचितो।प्यतिमदोद्धुरया न हि योऽर्पितः ॥ शरदुदीतविलासवशोत्थितो । ध्वनिरयं निरयंत्र्यत नो तदा ॥ ३०० ॥ एवंविधे शरत्काले । पश्यंतौ तौ वनश्रियम् ॥ बहिर्देशेषु विहृतौ । न दृष्टं रसनाकुलम् ॥ ३०१ ॥

करनारो तथा अत्यंत संभ्रम करनारो एवो वादलांओनो समूह रसविनानो (पाणी विनानो) थयो, तेथी निर्मल रात्रिनी साथे विलास करतो एवो चंद्र संतोषिओना अग्रेसरीपणाने प्राप्त थयो हतो. ॥ २९९ ॥ कोयले मागेलो एवो पण जे शब्द, अति मदोन्मत्त थएली एवी शालिना क्षेत्रनुं रक्षण करनारी बालिकाए नहीं आप्यो हतो; ते आ ध्वनि, शरद ऋतुथी उत्पन्न थएला विलासना वशथी उत्पन्न थयो थको ते वखते अटकावी शकायो नहीं. ॥ ३०० ॥ हवे एवी रीतना शरद ऋतुना समयमां तेओ बन्ने वननी शोभा जोता थका बहारना भागमां भम्या

पण त्यां रसनानु (जीभनु) कुल तेओनी नजरे पडयु नहीं ॥ ३०१ ॥ एवी रीते तेओ विचरता हता तेवामां, प्रगट रीते पथि लोकोना दांतोनी वीणाने वगडावनारो (ठंडीथी सीत्कार करावनारो) हेमत ऋतुनो समय आव्यो ॥ ३०२ ॥ सूर्यनु राज्य होते छते पण (अर्थात् दिवस होते छते पण) चद्रोदयनी योग्य लीलावालुं हिम जे लीलाने पामे छे, ते दुःखनी प्राप्तिथी थएला आयुष्यना घटाडाथी खरेखर (ते ऋतुमां) दिवसो टुका थया छे ॥ ३०३ ॥ वली ते समये चंद्रना किरणोनो प्रचार होते छते अमृतनी धाराथी करेल छे पारणु जेणे एवी चकोरोनी श्रेणिना आशिर्वादना दानथी शु

तयोर्विचरतोरेवं । हेमंततुः समाययौ ॥ स्फुटं पथिकलोकानां । दंतवीणैकवादकः ॥ ३०२ ॥
हिमं हिमांशूदययोग्यलीलं । चंमांशुराज्येऽपि यदेति लीलाम् ॥ तद्दुःखपूर्त्यायुरपक्रमेण ।
ह्रस्वाणि जातानि दिनानि नूनम् ॥ ३०३ ॥ करप्रचारे सति शीतरश्मेः । पीयूषधाराकृत-
पारणायाः॥आशीः प्रदानात्नु चकोरपंक्ते--र्जातास्तदा दीर्घतरा रजन्यः ॥३०४॥ निवर्तयामास
दवीयसोऽपि । देशाद्धिमार्तिः पथिकान् प्रवृद्धा ॥ क्लीबान् परानीकजयप्रथेव । पत्नीकुचाद्रेः
शरणे धृताशान् ॥ ३०५ ॥ नृणां मनांसीव सता मुखानि । श्रियं दधुः स्नेहमनोहराणि॥
न्नानोर्महांसीव वपूंपि शश्वद् । घनांवरान्नोगविलासन्नांजि ॥ ३०६ ॥ प्रियाकुचाश्लेपधृतोष्म-
न्नोगि--लोकेष्वलब्धस्वपदप्रचारा ॥ विगोयन्नृहुर्गतमानवेषु । पपात हेमंतपलादधाटी ॥ ३०७ ॥

रात्रिओ वधारे लांबी थइ ? ॥ ३०४ ॥ वली ते समये वृद्धि पामेली एवी ठडीनी पीडा शत्रुना, सैन्यना जीतना समाचार जेम कायरोने, तेम स्त्रीओना स्तनोरुपी पर्वतना आश्रयमां धारण करेल छे आशाओ जेओए, एवा वटेमार्गुओने दूर रहेला देशथी पण पाछा वालवा लागी ॥ ३०५ ॥ वली ते समये माणसोना मुखो, सज्जनोना मनोनी पेठे चिकासे (पक्षे–स्नेहे) करीने मनोहर थया थका शोभाने धरवा लाग्या, तथा तेओनां शरीरो सूर्यनां तेजोनी पेठे जाडां कपडांओना (पक्षे–वादळावाला आकाशनां) भोगना विलासने भजतां थकां शोभाने धरवा लाग्या. ॥ ३०६ ॥ स्त्रीओनां

उष्णता जेओए एवा भोगविलासमां मग्न थएला लोकोमां स्तनाना आलिंगनथी धारण करेल छे, स्त्रीओना वियोगथी खेद युक्त थएला नथी चालेल प्राक्रम जेणीनुं एवी हेमंत ऋतुरूपी राक्षसोनी धाड, सर्व भूमिपर भमतां थकां पण माणसोने उपद्रव करवा लागी ॥ ३०७ ॥ एवी रीते ते हेमंत ऋतुमां तेओने कोइ पण रीते, जीह्वाना मूलनी बातमी मली नहीं ॥ ३०८ ॥ पछी शुभ आशयवाला एवा तेओ बन्ने अंतरंग प्रदेशमां गया; त्यां तेओए राजसचित्त नामनुं नगर जोयुं. ॥३०९॥ ते नगरने लांबां वननी पेठे, घणा लोको विनानुं, तथा नायक विनानुं जोइने, प्रकर्ष (पोताना) मामाने कहेवा लाग्यो के, ॥३१०॥

ताभ्यां तत्राऽपि हेमंते । भ्रमद्भ्यां भूतलेऽखिले ॥ मूलशुद्धिर्न विज्ञाता । रसनायाः कथंचन ॥३०८॥अथांतरंगदेशेषु । प्रविष्टौ तौ शुभाशयौ॥तत्र राजसचित्ताख्यं । ताभ्यां नगरमीक्षितम्॥ ॥ ३०९ ॥ तच्चदीर्घमिवारण्यं । बहुलोकविवर्जितम् ॥ निर्नायकं च संप्रेक्ष्य । प्रकर्षो मातुलं जगौ ॥ ३१० ॥ अभूत्किमिदमेतादृक् । कथं चेत्थमपि श्रियम् ॥ धत्ते ततो विमर्शोऽपि । प्रकर्षं प्रत्यभाषत ॥ ३११ ॥ निरुपद्रवमेवेदं । नगरं परिभाव्यते ॥ निःक्रांतराजकं क्वापि । कुतश्चित्तु प्रयोजनात् ॥ ३१२ ॥ पुंविशेषप्रभावाच्च । सश्रीकमिदमीक्ष्यते ॥ ततो राजकुले गत्वा । दृष्टस्ताभ्यां पुमानसौ ॥ ३१३ ॥ अहंकारादिकतिचि–त्पुरुषैः परिवारितः ॥ उदार-विक्रमो मिथ्या–ऽभिमानाख्यो महत्तमः ॥ ३१४ ॥

आ नगर आवुं केम छे ? तथा आवुं छतां पण ते शोभाने केम धारण करे छे ? त्यारे विमर्श पण प्रकर्षने कहेवा लाग्यो के, ॥ ३११ ॥ कोइक कारणथी अहींनो राजा क्यांक चाल्यो गयो छे, अने तेथी आ नगर उपद्रव विनानुंज देखाय छे. ॥ ३१२ ॥ वली कोइक पुरुष विशेषना प्रभावथी आ नगर शोभावालुं देखाय छे; पछी तेओए राजकुलमां जइने ते पुरुषने जोयो. ॥ ३१३ ॥ ते महान् पराक्रमी मिथ्या-ऽभिमान नामनो कारभारी त्यां अहंकार आदिक केटलाक पुरुषोथी वींटाइने रह्यो हतो. ॥ ३१४ ॥

पछी तेओए तेने (त्यांना) लोकोना निकली जवानु कारण पूछ्युं; त्यारे तेणे कह्यु के, आ नगरनो राग केसरी नामे राजा छे ॥ ३१५ ॥ अक्षय शासनवालो तेनो महा मोह नामनो पिता जयवतो वर्ते छे तथा तेने विषयाभिलाष आदिक अनेक मन्त्रिओ छे ॥ ३१६ ॥ हवे सर्व लश्कर सहित दडयात्रा माटे आ नगरथी गयाने तेओने अनतो काल थइ गया छे ॥ ३१७ ॥ माटे हे सरल स्वभावीओ! तेथी आ नगर माणसो रहित थएलु छे; त्यारे विमर्शे कह्यु के, तेओनो ते संग्राम कोनी साथेनो छे ॥॥३१८॥त्यारे मिथ्याभिमाने

पृष्टस्ताभ्या ततो लोक--विरलीभावकारणम् ॥ स प्राहास्य पुरस्यास्ति । नायको रागकेसरी ॥ ३१५ ॥ तत्पिता च महामोहो । जयत्यक्षयशासनः ॥ संत्यस्याऽनेके विषया--भिलापाद्याश्च मंत्रिणः ॥ ३१६ ॥ सर्वानीकयुजां तेषां । सर्वेषां नगरादितः ॥ कालोऽनंतो ह्यतिक्रातो । गतानां दंडयात्रया ॥ ३१७ ॥ सरलौ तेन नगर--मिदं विरलमानवम् ॥ विमर्शः प्राह को नामा । तेषां नन्वस्ति विग्रहः ॥ ॥ ३१८ ॥ ऊचे मिथ्याभिमानोऽथ । संतोषेण दुरात्मना ॥ प्रत्यब्रवीद्विमर्शोऽथ । को हेतुस्तेन विग्रहे ॥ ३१९ ॥ परो जगाद विषया—ऽभिलाषः प्राहिणोज्जगत् ॥ पंच जेतुं निजगृह--मानुषाणि स्मयोद्धुरः ॥ ३२० ॥ विश्वे वशीकृतप्राये । तैर्जित्वा तानि मानवान् ॥ संतोषो निर्वृतौ पुर्यां । निनाय कियतोऽपि हि ॥ ३२१ ॥ तच्छ्रुत्वा तज्जयायोच्चै--र्निर्गतो रागकेसरी॥ तदयं विग्रहहेतु- धूमकेतुरिवोत्थितः ॥ ३२२ ॥

कह्युं के, ते सग्राम लुच्चा एवा सतोष साथेनो छे, त्यारे विमर्शे कह्यु के, तेनी साथेना सग्रामनुं शु कारण छे? ॥ ३१९ ॥ त्यारे मिथ्याभिमाने कह्यु के, अहकारथी उद्धत थएला विषयाभिलाषे जगतने जीतवा माटे पोताना घरना पांच माणसोने मोकल्यां हतां ॥ ३२० ॥ तेओए जगतने प्राये करीने वश कर्युं; पण सतोषे तेओने जीतीने केटलाक माणसोने मोक्ष नगरमां मोकल्यां ॥ ३२१ ॥ ते (बातमी) साभलीने तेने जीतवा माटे रागकेसरी गयो छे, माटे धूमकेतु सरखो संग्रामनो आ हेतु

उत्पन्न थयो छे. ॥ ३२२ ॥ त्यारे विमर्शे विचार्युं के, जीह्वाना मूलनी आटली बातमी तो मली, हवे विषयाभिलाषने जोवाथी वधारे पण मलशे. ॥ ३२३ ॥पछी फरीने तेणे कह्युं के, ज्यारे एम छे, त्यारे तमारुं अहीं रहेवानुं केम थयुं छे ? त्यारे मिथ्याभिमाने कह्युं के ॥ ३२४ ॥ हुं पण (तेमनी साथेज) चाल्यो हतो, पण (मारा) स्वामीए मने अगाडीना सैन्यमांथी पाछो वालीने कह्युं के, तारे (अहीं रहीने) नगरनुं रक्षण करवुं. ॥ ३२५ ॥ आ नगरनुं, रक्षण करवामां तुंज समर्थ छे; अने तुं अहीं रहेते छते

दध्यौ विमर्शो रसना--मूलोत्थानमयेयता ॥ लब्धं लप्स्ये च विषया--ऽभिलाषेक्षणतोऽधिकम् ॥ ३२३ ॥ पुनः प्राह च यद्येवं । तदा कथमवस्थितिः ॥ अत्राऽभूद्भवतो मिथ्या--ऽभिमानोऽथाकिरद्गिरः ॥ ३२४ ॥ संप्रस्थितोऽहमप्यास--मग्रानीकान्निवर्तितः ॥ देवेन परमुक्तं च । नगरं रक्ष्यतां त्वया ॥ ३२५॥ नगरस्य त्वमेवास्य । प्रतिजागरणक्षमः ॥ त्वयि स्थिते वयमपि । स्थिताः स्मः परमार्थतः ॥ ३२६ ॥ स्थितोऽहमत्र तद्देवा--देशादित्यवधारय ॥ विमर्शः प्राह सद्वार्ता । कापि प्रत्यागता ततः ॥ ॥ ३२७ ॥ प्राह मिथ्याभिमानोऽथ । सद्वार्ता बाढमागता ॥ जितप्रायं जगत्सर्वं । देवानीकेन वर्तते॥ ३२८ ॥ ददाति प्रत्यवस्कंदान् । संतोषोऽप्यंतरांतरा ॥ जनं कंचिन्नयत्युच्चै । र्विलंबोऽयं भवत्यतः ॥ ३२९ ॥ विमर्शो न्यगदद्देवः । क्वाऽधुना श्रूयते स्थितः ॥ ततः कल्पितमाहस्म । परः प्रणिधिशंकया ॥ ३३० ॥

परमार्थथी अमो पण अहींज रह्या छीए (एम जाणवुं) ॥ ३२६ ॥ हवे तेथी हुं स्वामिनी आज्ञाथी अहीं रह्यो छउं, एम तुं जाणजे ! पछी विमर्शे कह्युं के, हवे त्यांथी कंइ कुशल समाचार आव्या छे? ॥ ३२७ ॥ त्यारे मिथ्याभिमाने कह्युं के, त्यांथी तो घणाए कुशल समाचार आव्या छे, अने (अमारा) स्वामीना सैन्ये प्राये करीने सर्व जगतने जीत्युं छे. ॥ ३२८ ॥ वली वच्चे वच्चे संतोष पण छापो मारी जाय छे, अने कोइक माणसने (मोक्षमां) लेइ जाय छे, अने तेथी आ विलंब लागे छे.॥३२९॥ पछी विमर्शे

कह्यु के, हालमां ते तमारो स्वामी क्यां रहेलो संभलाय छे ? त्यारे ते मिथ्याभिमान (अमोने शुभ चरनी शंकाथी जाणीने) कल्पित वात कहेवा लाग्यो के, ॥ ३३० ॥ अमारो स्वामी अहींथी तामसचित्त नामना नगरने उद्देशीने गयो छे; माटे कदाचित् (हजु) त्यांज होशे, एम जणाय छे ॥ ३३१ ॥ पछी विमर्श अने प्रकर्ष तेनी रजा लेइने, त्यांथी मोह राजाना सैन्यमां रहेला विषयाभिलापने जोवामाटे त्यां जवा लाग्या ॥ ३३२ ॥ पछी तेओ झेरथी बनावेला, अने चोरोना समूहने सुख आपनारां, तथा साधुओने खेद आपनारां एवां ते तामसचित्त नामना नगरमां पहोंच्या ॥ ३३३ ॥ ते नगर चारे

पुरं तामसचित्ताख्यं । देवो ह्युद्दिश्य निर्गतः ॥ अतः कदाचित्तत्रैव । स्थितः स्यादिति बुध्यते॥ ॥ ३३१ ॥ विमर्शश्च प्रकर्षश्च । तमापृछ्य गतौ ततः ॥ वीक्षितुं तत्र विषया--भिलापं मोहसैन्यगम् ॥ ३३२ ॥ प्राप्तौ तामसचित्ताख्यं । नगरं गरनिर्मितम् ॥ शर्मदं चौरवृंदानां । साधूनामरतिप्रदम् ॥ ३३३ ॥ सर्वतोऽपि यदन्याय--धूमधाराभिरावृतम् ॥ पलायंते गुणा यस्मा--न्मिलाता मशका इव ॥ ३३४ ॥ उद्योताऽभावतो नेति । दिनं यत्र कदाचन ॥ विलासं कलयत्युच्चैः । केवलैव महानिशा ॥ ३३५ ॥ भवाभिनंदिता यत्र । परिखावलयायिता ॥ अनादिकूटसंस्कारो । दुर्गोऽस्ति परदुर्ग्रहः ॥ ३३६ ॥ दवदग्धमिवारण्यं । ताभ्यां तदपि वीक्षितम् ॥ भूरिलोकोज्झितं किंतु । न मुक्तं निजशोभया ॥ ३३७ ॥

बाजुथी अन्यायरूपी धुवाडानी श्रेणिओथी वींटाएलुं हतु, तथा ज्यांथी एकठा थएला मच्छरोनी पेठे गुणो तो नाशी जता हता ॥ ३३४ ॥ वली जे नगरमां उद्योतना अभावथी दिवस तो कोइ वखते पण आवतो नथी, पण केवल घोर रात्रीज त्यां उंचे प्रकारे विलास करे छे ॥ ३३५ ॥ वली ज्यां " भवाभिनंदिपणुं "तो खाइनी पेठे तेने वींटी रह्युं हतुं, अने शत्रुओथी न जीताय तेवो त्यां "अनादि कूट संस्कार" नामनो किल्लो हतो ॥ ३३६ ॥ हवे तेओए ते नगरने दावानलथी बलेला वननी पेठे जोयुं, वली जो के ते घणां लोकोथी तजाएलुं होतु, तो पण पोतानी शोभाथी ते रहित नहोतुं थयु ॥ ३३७ ॥

हवे तेवी रीतनां ते नगरने जोइने विस्मय पामेलो प्रकर्ष (पोताना) मामाने कहेवा लाग्यो के, अहीं आ नगरनो मुख्य स्वामी छे के नहीं? त्यारे तेणे कह्युं के, नथीज. ॥३३८॥ एटलामां तेओए अगाडी नगरमां प्रवेश करवानी इच्छावाला तथा दीनता अने आक्रंदादिकें करीने युक्त थएला एवा एक शोक नामना वटेमार्गुने जोयो. ॥ ३३९ ॥ त्यारे तेओए तेने कह्युं के, हे भद्र! आ नगरमां राजा कोण छे? त्यारे शोके कह्युं के, (अरे!) आ नगरनो राजा तो त्रणे जगतमां प्रख्यात छे. ॥ ३४० ॥ ते राजा रागकेसरिनो भाइ, महामोह राजानो पुत्र, अविवेकितानो स्वामी, तथा तेजना भंडार रूप छे. ॥ ३४१ ॥

तत्तादृग् विस्मितः प्रेक्ष्य । प्रकर्षः प्राह मातुलम् ॥ मूलनेताऽस्ति नो वाऽत्र । नैवास्तीत्यब्रवीच्च सः ॥ ३३८ ॥ ताभ्यामत्रांतरे दृष्टः । प्रविविक्षुः पुरं पुरः ॥ शोकाख्यः प्रातिपथिको । दैन्याक्रंदादिसंयुतः ॥ ३३९ ॥ ताभ्यां संभाषितश्चायं । भद्राऽस्मिन् कः पुरे नृपः ॥ शोकः प्राह पुरस्यास्य । ख्यातो भ्वीशो जगत्त्रये ॥ ३४० ॥ रागकेसरिणो भ्राता । महामोहनृपात्मजः ॥ भर्ताऽविवेकितायाश्च । नृपोऽसौ महसां निधिः ॥ ३४१ ॥ दृष्टिर्भ्रूभंगुरा यस्यां । पतत्यस्य तडिन्निभा ॥ दूराद्देवा अपि त्रस्ताः । कुर्वंत्यस्यै दिशे नमः ॥ ३४२ ॥ ज्वलनेऽपि पतंत्यस्य । प्रतापमसहिष्णवः ॥ विशंत्यपि वने मूर्त्त–त्पंचाननघनध्वनौ ॥ ३४३ ॥ विक्रमाक्रांतभुवनो–भानुजैत्रप्रतापवान् ॥ प्रष्टव्यः स्यात्कथं द्वेष–गजेंद्रोऽसौ महाबलः ३४४

आ राजानी भ्रुकुटिथी भंगुर थएली, तथा वीजली सरखी एवी दृष्टि जे दिशामां पडे छे, ते दिशामांथी देवो पण डरीने ते दिशाने दूरथी नमस्कार करे छे. ॥ ३४२ ॥ आना प्रतापने नहीं सहन करता थका प्राणीओ अग्निमां पण पडे छे, तथा जेमां सिंहोनी भयंकर गर्जनाओ थइ रही छे, एवा वनमां पण दाखल थाय छे. ॥ ३४३ ॥ पराक्रमथी दबावेल छे जगतने जेणे, तथा सूर्यने पण जितनारा एवा प्रतापवाला, तथा महाबलवान एवा आ द्वेषगजेंद्र नामना राजा माटे वली पूछवानुं ते शुं

होय ! ॥ ३४४ ॥ वली ते अमारो स्वामी तो एक बाजु रहो, पण महाशक्तिवाली एवी जे अमारी अविवेकिता नामनी राणी तत्क्षण जगत्‌ने पण मोह पमाडे छे, ते पण अत्रे प्रख्यात छे ॥ ३४५ ॥ ते राणी महामोह राजानी आज्ञाने कोइ पण समये उलघती नथी, तथा हमेशां महामूढतानी आज्ञामा वर्ते छे ॥ ३४६ ॥ वली ते रागकेसरिनी आज्ञाथी दूर तो रहेतीज नथी; तथा मूढता रूप तेनी स्त्रीनी प्रीति सारी रीते वधारे छे ॥ ३४७ ॥ वली ते (पोताना) स्वामि द्वेषगजेंद्रना कहेवा प्रमाणे वर्ते छे, अने एवी रीते ते अविवेकिता त्रणे जगतमां गुणोथी प्रख्याति पामी छे ॥ ३४८ ॥

आस्तां देवः परं विश्वं । या मोहयति तत्क्षणात् ॥ ख्याताऽविवेकिताऽप्यत्र । सा देवी शक्तिमाजनम् ॥ ३४५ ॥ महामोहस्य निर्देशं । सा नाऽत्येति कदाचन ॥ सा महामूढताज्ञायां । वर्तते सर्वदा वधूः ॥ ३४६ ॥ रागकेसरिनिर्देशा–द्दूरे सा नैव तिष्ठति ॥ मूढतायाश्च तत्पत्न्याः । प्रीति सा वर्धयत्यलम् ॥ ३४७ ॥ भर्तुर्द्वेषगजेंद्रस्य । साऽनुवृत्तिपरायणा ॥ इत्थं गुणैर्गता श्लाघां । त्रैलोक्येऽप्यविवेकिता ॥ ३४८ ॥ ख्यातावेतौ न किं ज्ञातौ । त्वया देवीनरेश्वरौ ॥ विमर्शः प्राह पथिका–वावां दूरादिहागतौ ॥ ३४९ ॥ दृष्टं पुरं पुरा नेदं । श्रुतौ देवीनृपौ भृशम् ॥ किं स्याद् द्वेषगजेंद्रो वा । ऽन्यत्र वेति तु पृछ्यते ॥ ३५० ॥ शोकः प्राह जगत्येव । वार्ता छन्नेयमस्ति न ॥ निर्गतो यन्महामोहः । संतोषजयकाम्यया ॥ ३५१ ॥

एवी रीतना प्रख्यात एवा आ राजा राणीनी शु तमोने मालुम नथी ? त्यारे विमर्शे कह्यु के, अमो तो वटेमार्गुओ छीए, अने दूर देशथी अहीं आव्या छीए ॥ ३४९ ॥ वली अमोए आ नगर पेहेलां तो जोयु न होतु, पण राजा राणीने तो घणीवार सांभल्यां हतां; हवे अमो तने पूछीए छीए के, ते द्वेषगजेंद्र अहीं छे के, बीजी जगोए छे ? ॥ ३५० ॥ त्यारे शोके कह्यु के, आ वात तो कइ जगतमां छानी नथी; के महा मोह राजाए संतोषने जीतवानी इच्छाथी प्रयाण कर्यु छे ॥ ३५१ ॥

वली तेनी पासे रागकेसरी सहित द्वेषगजेंद्र अने सघलुं लश्कर पण छे, अने (तेओने गये) घणो समय व्यतीत थयो छे. ॥ ३५२ ॥ त्यारे विमर्शे कह्युं के, जो एम छे, तो तुं अहीं केम आव्यो छे? अने ते अविवेकिता अहीं छे के नहीं? ते तुं अमोने खरेखर कहे? ॥ ३५३ ॥ त्यारे शोके कह्युं के, [illegible]लमां तो ते अविवेकिता आ नगरमां तेम राजानी पासे पण नथी; अने तेनुं कारण तुं [illegible]ल? ॥ ३५४ ॥ अमारा स्वामीए दुष्ट एवा संतोषने मारवानी इच्छाथी ज्यारे प्रयाण कर्युं, त्यारे भर्तारना मन प्रमाणे चालनारी राणीए साथे प्रयाण करवा मांड्युं. ॥ ३५५ ॥ त्यारे द्वेषगजेंद्रे तेणीने

पार्श्वे द्वेषगजेंद्रोऽपि। रागकसेरिसंयुतः॥ तस्यास्ति सर्वसैन्यं च । भूयान् कालोऽत्र लंघितः॥ ॥३५२॥ विमर्शः प्राह यद्येवं । ततस्त्वं किमिहागतः॥ किं साऽविवेकितास्त्यत्र । न वेति त्वं ध्रुवं वद ॥३५३॥ शोकः प्राह पुरेऽत्राऽस्ति । नाधुना साऽविवेकिता॥ नाऽपि देवस्य पार्श्वे च। तत्राऽ। कर्णय कारणम् ॥ ३५४ ॥ देवे प्रचलिते दुष्ट--संतोषवधकाम्यया ॥ देव्यपि प्रस्थिता सार्धं । भर्तृचित्तानुयायिनी ॥ ३५५ ॥ ततो द्वेषगजेंद्रेण। प्रोक्ता सा त्वच्छरीरकम् ॥ स्कंधा-वारक्षमं नास्ति । देवि गर्भभरालसम् ॥ ३५६ ॥ तस्मादत्रैव तिष्ठ त्वं । रणरंगे व्रजाम्यहम् ॥ तयोक्तं न पुरेऽत्राहं । त्वां विना स्थातुमुत्सहे ॥ ३५७ ॥ प्रत्युक्ता साऽथ देवेन । दृढस्नेहाऽसि यद्यपि ॥ तथापि तव नो युक्तंस्कंधावारे प्रवर्तनम् ॥३५८॥ किंतु रौद्रपुरे दुष्टा--शयेन परि-रक्षिता ॥ तिष्ठ चिंतोज्झिता गत्वा । स हि मे सेवकोत्तमः ॥ ३५९ ॥

कह्युं के, हे देवी! गर्भना भारथी भारी थएलुं एवुं तारुं शरीर लश्करी छावणीमां रहेवा योग्य नथी. ॥३५६॥माटे तुं अहींज रहे? अने हुं रणांगणमां जउं छुं; त्यारे तेणीए कह्युं के, तमारा विना आ नगरमां रहेवुं मने गमतुं नथी- ॥ ३५७ ॥ त्यारे राजाए तेणीने वलतुं कह्युं के; जो के तुं निबिड स्नेहवाली छे, तो पण तारे लश्करी छावणीमां आववुं योग्य नथी. ॥ ३५८ ॥ पण तुं रौद्रपुरमां जइने दुष्टाशयथी

रक्षित थइ थकी निश्चिंत थइने रहेजे केमके ते मारो उत्तम सेवक छे ॥ ३५९ ॥ हवे पतिना प्रबल आग्रहने दूर करवाने समर्थ नहीं थवाथी, तेना हुकमथी ते रौद्रचित्त नामना नगरमां गइ ॥ ३६० ॥ अने हमणां ते कोइक कारणथी बाह्य नगरोमां छे, वली तेणीने पेहेलां एक पुत्र थयो हतो, अने हमणा पण भर्तारना सगथी एक बीजो पुत्र तेणीने थयो छे, एम सांभल्युं छे; अने ते हेतुथी ते राणी अहीं नथी; वली मने अहीं आववानो जे हेतु छे, ते हु तने कहु छुं ॥ ३६१ ॥ ३६२ ॥ हवे मतिमोहने अहीं राखतां थकां अमारा स्वामीए तेने कह्युं के, तारे आ नगरने तजवु

निर्बंधं प्रबलं पत्युः । पराकर्तुमशक्नुमा ॥ रौद्रचित्तपुरे देवी । तदादेशेन संगता ॥ ३६० ॥
कुतोऽपि हेतोर्बाह्येषु । सा पुरेष्वस्ति साम्प्रतम् ॥ प्राक् तयैकः सुतो जातः । श्रूयतेऽन्योऽपि
चाऽधुना ॥३६१॥ भर्तृसंयोगतो जातो । देवी तेनात्र नास्ति सा ॥ ममात्रागमने यत्तु । कारणं
कथयामि तत् ॥ युग्मम् ॥ ३६२ ॥ प्रतिष्ठमान एवेदं । मतिमोहं प्रभुर्जगौ ॥ न त्वयेदं पुरं
त्याज्यं । त्वमेतद्रक्षणक्षम·॥३६३॥स देवाज्ञां समासाद्य । स्थितोऽत्रैव पुरे ततः ॥ आगतोऽहं
चिरात्तस्य । मित्रस्यात्र दिदृक्षया ॥३६४॥ दीर्घाटव्यां स्थितं मुक्तं । मया देवस्य साधनम् ॥
एतदुक्त्वा गतः शोको । नगरे स्वार्थसिद्धये ॥ ३६५ ॥ विमर्शेन ततः प्रोक्तं । प्रकर्षप्रति
भद्र या ॥ आटवी साधनाधारा । दीर्घा शोकेन दर्शिता ॥ ३६६ ॥ द्रष्टव्यस्तत्र गत्वैव ।
रागकेसरिमंत्रिराट् ॥ प्रकर्षः प्राह वचनं । प्रमाणं मातुलस्य मे ॥ ३६७ ॥

नहीं; केमके, तु आ नगरनु रक्षण करवाने समर्थ छे ॥ ३६३ ॥ पछी स्वामिनी आज्ञाने मेलवीने ते आज नगरमां रह्यो छे; अने ते मित्रने मलवानी इच्छाथी घणे काले हु अहीं आव्यो छउ ॥ ३६४ ॥ वली मे स्वामिना सैन्यने लांबी अटवीमां छोड्यु छे; एटलु कहीने ते शोक पोताना कार्यनी सिद्धि माटे नगरमां गयो ॥ ३६५ ॥ पछी विमर्शे प्रकर्षने कह्यु के, हे भद्र ! ते लश्कर-वाली जे अटवी शोके देखाडी, ते (बहु) लांबी छे ॥३६६ ॥ (तो पण)त्यां जइने ते रागकेसरि महा-

मंत्रीने (आपणे) जोवो, त्यारे प्रकर्षे कह्युं के, मामानुं वचन मारे प्रमाण छे. ॥ ३६७ ॥ पछी वायु सरखा वेगवाला तथा महा उद्यमी एवा ते मामो भाणेज हर्षथी त्यां गया; अने ते महा अटवीना मध्य भागमां पहोंच्या. ॥ ३६८ ॥ हवे अति दूर नहीं गया तेटलामांज विस्मित थएल छे नेत्रो जेमनां एवा तेओ बन्नेए, रागकेसरिथी युक्त थएला, द्वेषरुपी हाथी थी वींटाएला, चतुरंगी सेनाथी स्फुरायमान थएला तथा महोटीनदीना नीचाणना रेताल कांठाना मेदानमां छावणी नाखीने पडेला, तथा मोटा मंडपथी शोभित थएली वेदिकापर विलास करता, तथा क्रोडो सुभटोथी वींटाएला, तथा मोटा सिंहासनपर

ततो मुदानिलोद्वेगौ । गतौ स्वस्त्रीयमातुलौ ॥ नागे च मध्यमे प्राप्तौ । महाटव्या महोद्यमौ ॥ ३६७ ॥ महामोहनृपं तत्र । रागकेसरिणा युतम् ॥ वृतं द्वेषगजेंद्रेण । चतुरंगबलोब्लणम् ॥ ३६९ ॥ आवासितं महानद्याः । पुलिने परिणाहिनि ॥ महामंमपविभ्राज--द्वेदिकायां वि- लासिनम् ॥ ३७० ॥ वेष्टितं भटकोटीभि--र्महासिंहासनस्थितम् ॥ पश्यतः स्म गतौ नाति दूरं तौ विस्मितेक्षणौ ॥ ३७१ ॥ त्रिभिर्विशेषकम् ॥ पप्रच्छाऽथ प्रकर्षः का । मातुलेयं महा- टवी ॥ केयं महानदी दीर्घा । किमिदं पुलिनं पृथु ॥ ३७२ ॥ मंमपश्च महान् कोऽय--मेषा का वरवेदिका ॥ सिंहासनं किमेतच्च । ममेदं कीर्तयाऽखिलम् ॥ ३७३ ॥ महामोहनरेंद्रोऽयं । स्थिताश्चात्र नृपा इमे ॥ वर्णनीयाः स्वरूपेण । कौतुकं महदत्र मे ॥ ३७४ ॥ विमर्शोऽथ स- मालोच्य । महाटव्यादिनिश्चलम् ॥ प्रविश्य ध्यानमाधाय । समाधिमिदमभ्यधात् ॥ ३७५ ॥

बेठेला एवा महामोह राजाने जोयो. ॥ ३६९ ॥ ३७० ॥ ३७१ ॥ हवे प्रकर्षे पूछ्युं के, हे मामाजी! आ महा अटवी कइ छे? तेम आ लांबी मोटी नदी केइ छे? अने आ पोहोळुं रेताल मेदान कयुं छे? ॥ ३७२ ॥ वली आ मोटो मंडप कयो छे? तेम आ मनोहर वेदिका कइ छे? अने आ सिंहासन कयुं छे? ते सघलुं तुं मने कहे? ॥ ३७३ ॥ वली आ महामोह राजा, तथा अहीं रहेला आ राजाओ (कोण छे?) तेनुं स्वरुप तुं मने कही बताव? केमके, तेमां मने मोटुं आश्चर्य छे. ॥ ३७४ ॥ हवे विमर्शे

महाटव्यादिकने निश्चल जाणीने, तथा ध्यानमां प्रवेश करीने, अने समाधि धरीने नीचे प्रमाणे कहेवा लाग्यो ॥ ३७५ ॥ हे प्रकर्ष ! आ महा अटवीने आश्चर्यनी भूमि सरखी तुं चित्तवृत्ति जाणजे? ते अटवीना पारने पहोंचवाने अनंत वर्षों सुधि पण कोइ पण माणस समर्थ न थाय ॥ ३७६ ॥ ए अटवी अनर्थोनी श्रेणिओने, तथा शुभनी श्रेणिओने उत्पन्न करवाना हेतभुत छे; अने तेथी ते झेर अने अमृतने उत्पन्न करना एवा समुद्रनी तुलनाने धारण करे छे ॥ ३७७ ॥ वली आ अटवीमा प्रगट फलोवालां झेरी वृक्षोथी दुर्भागी एवा जड प्राणीओ लोभाय छे; पण शांत

प्रकर्ष जानीहि महाटवीय--माश्चर्यभूमिर्ननु चित्तवृत्तिः ॥ वर्षैरनंतैरपि पारमस्या । न गाहितुं कोऽपि जनः प्रभुः स्यात् ॥ ३७६ ॥ इयं महाऽनर्थपरंपराणा । मुत्पत्तिहेतुश्च शुभावलीनाम् ॥ समानतां वारिनिधेर्बिभर्ति । पीयूषमुत्पादयतो विषं च ॥ ३७७ ॥ विषद्रुमैरत्र परिस्फुटोग्र फलैर्विलुभ्यंति जना हताशाः ॥ अन्नैरिहैव त्रिदशद्रुमैश्च । कुर्वंति शांता मुनयः स्ववृत्तिम् ॥ ३७८ ॥ द्रुमैर्विजातीयफलैरपीह । स्वभावनाधूपविशेषयोगात् ॥ फलं यदन्यत् प्रवितीर्यतेऽस्याः । स कोऽप्यचिंत्यो विपयानुभावः ॥ ३७९ ॥ इह स्थिता ग्रामपुराकरादि—भुवोऽतरंगस्य जनव्रजस्य ॥ वाह्योऽपि देशः प्रविवक्षितोऽस्या । भेदं घटाकाशवदेति नैव ॥ ३८० ॥ इमा विना चित्रनिजानुभावा । वाह्यस्य देशस्य न लक्ष्यते श्रीः ॥ विना हि तेजो दहनस्य रूपं । भस्मावशेषं प्रतिभाति पुंसाम् ॥ ३८१ ॥

मुनिओ तो अहींज गुप्त रीते रहेलां कल्पवृक्षोथी पोतानी आजीविका चलावे छे ॥ ३७८ ॥ वली अही स्वभावनारूपी धूप विशेषना योगथी जुदी जातिनां फलवालां वृक्षो जे जुदुज फल आपे छे, ते आ अटवीनो कोइ अलौकिक विपयानुभाव छे ॥ ३७९ ॥ वली अही अंतरग जन समूहनी, गाम, नगर, खाण आदिक भूमिओ रहेली छे; तेम कहेलो एवो आ अटवीनो वाह्य देश पण घटाकाशनी पेठे भेदने प्राप्त थतो नथी ॥ ३८० ॥ विचित्र प्रकारना आत्माना अनुभाववाली एवी आ अटवीविना वाह्य देशनी

रागना पाशना विस्तारथी छवाएल छे शुद्धशील (पक्षे--पत्थरो) जेमां एवुं छे ॥ ३९२ ॥ वली ते मेदान उत्सुकतारुपी मदिराना मदथी डोलता एवा अविवेकी लोकोए करेल छे विलासोनो समूह जेमां एवुं छे तथा विस्तार पामेली एवी संज्ञारुपी पवननी लहरीओनी क्रीडाथी तरंगयुक्त थएलुं, अने रेशमी वस्त्रनी पेठे उज्ज्वल शोभावालुं छे. ॥ ३९३ ॥ वली आ मेदान, उत्तम वृष्टिनुं पडवुं जेम दावानलथी बलेला वनवृक्षोना समूहने, तेम महामुनिओनां पण शांत मनने विकार उत्पन्न करे छे. ॥ ३९४ ॥ वली जे आ मंडपने तुं जुए छे, ते चित्तविक्षेप नामनो मंडप छे; के जेनी अंदर प्रवेश करतां थकांज

औत्सुक्यहालामदघूर्णमाना—ऽविवेकिलोकैःकृतविभ्रमौघम् ॥ विस्तारिसंज्ञापवनोर्मिलीला—
तरंगितं क्षौममिवोज्ज्वलश्रि ॥३९३॥ उज्जीवयत्येव विकारमेत—न्महामुनीनामपि शांतमंतः॥
वनद्रुमौघं वनवह्निदग्धं । विशिष्टवृष्टेरिव सन्निपातः ॥ ३९४ ॥ यमीक्षसे मंडपमेष चित्त—
विक्षेपनामा विपुलानुभावः ॥ प्रविष्टमात्रस्य किलाऽत्र जंतोः । संतोषगंधोऽपि रतिं न दत्ते ॥
॥ ३९५ ॥ विष्णोरिवाब्धिर्गिरिकंदरेव । सिंहस्य कैलास इवेश्वरस्य ॥ शृंगं त्विषां पत्युरिवो-
दयाद्रे—रौन्नत्यकृन्मोहमहीभृतोऽयम् ॥ ३९६ ॥ अत्र प्रविष्टं यदपींद्रजालम् । पुनः पुनः
कल्पयतींद्रजालम् ॥ महेंद्रजालं तदसावनिष्टाधिष्टानधीः किं न जगज्जनानाम् ॥ ३९७ ॥
सरागतोद्यत्परभागनाग—द्युमर्त्यलोकेषु यदस्ति वस्तु ॥ अत्र स्थितेरेव जनोऽनुभावा । त्सर्वत्र
तत्र भ्रमतीति चित्रम् ॥ ३९८ ॥

प्राणीने विस्तारवंत अनुभाववालो संतोषनो गंध पण खुशी करतो नथी. ॥ ३९५ ॥ विष्णुने जेम समुद्र, सिंहने जेम पर्वतनी गुफा, महादेवने जेम कैलास, तथा सूर्यने जेम उदयाचलनुं शिखर, तेम आ मंडप मोहराजानी उन्नति करनारो छे. ॥ ३९६ ॥ आ मंडपनी अंदर दाखल थएलो एवो इंद्रोनो समूह पण फरी फरीने इंद्रजालने कल्पे छे; माटे महा इंद्रजाल सरखो एवो आ मंडप,जगतना लोकोने दुष्टबुद्धिरूप शुं न थाय ! (अर्थात् थायज.) ॥ ३९७ ॥ सरागपणाथी उत्पन्न थतो छे परभाग जेमां

ग्वा पाताल, देवलोक तथा मनुष्य लोकमां जे वस्तु रहेली छे, ते सर्वमां अहीं रह्यो थकोज माणस अनुभवथी भमे छे ए आश्चर्य छे !! ॥ ३९८ ॥ नक्षत्रोना चक्रनी गतिथी अहीं प्राप्त थएलो माणस जे भ्रमणोथी खेद पामतो नथी, तेथी आ मडप अंदर शून्य अने बहारथी विस्तारवत एवा आकाशना विलासने धारण करे छे ॥ ३९९ ॥ वली अहीं (आवेलो) मनुष्य मेहेनत विनाज हिंचोलाना विलासना सुखना अनुभवने प्राप्त थाय छे; तेम अहीं वसता एवा मोहराजाना कहेवा प्रमाणे वर्ततो कयो प्राणी हर्षने प्राप्त थतो नथी ? ॥४००॥ आ मोहराजा पोताना प्राक्रमथी, मोक्ष करनारी एवी माणसोनी

गतोऽत्र लोको ग्रहचक्रगत्या । न चंक्रमेऽन्यो यदुपैति खेदम् ॥ तदेप धत्ते नभसो विलासं । शून्यस्य चातर्वहिराततस्य ॥ ३९९ ॥ प्राप्नोति लोकोऽत्र विना श्रमेण । दोलाविलासस्य सुखानुभूतिम् ॥ वसंतमस्मिन्ननुवर्तमानो । मोहं न को हंत तदेति हर्षम् ॥४००॥ अयं स्ववीर्यान्मनसो जनाना । मेकाग्रतां मुक्तिकरीं निहंति॥इह प्रविष्टा. कलयंति मोहा—त्ञापभ्रमोन्मादविरत्यपायान् ॥ ४०१ ॥ अंतर्नृपाणां सुखहेतुरेप । वहिर्जनाना गुणविप्लवाय ॥ पुरः स्फुरंतीमिह वेदिकां च । तृष्णाभिधानां कलयाऽनैघनाम् ॥ चंचद्रुचिव्याप्तभुवो विलासं । विडंबयंतीं रविमंडलस्य ॥ ४०३ ॥ निशाविलासः खलु तामसानां । रुच्योऽपि पुंसा तनुतेऽक्षिमुद्राम् ॥ ४०२ ॥ पुरः स्फुरंती-

एकाग्रताने हणे छे; तथा अहीं दाखल थएला प्राणीओ मोहथी खेद, भ्रम, उन्माद अने विरतिना नाशने मेलवे छे ॥४०१॥ वली आ मोहराजा (अहीं) अदर रहेला राजाओने सुखनो हेतुरूप छे, अने बहारना माणसोना गुणोनो नाश करनारो छे; केमके, मनोहर एवो पण चद्र रात्रि अध माणसोनी आंखोनी मुद्राने विस्तारे छे ॥४०२॥ वली हे निष्पापि प्रकर्ष ! चलकती कांतिथी व्याप्त थएल छे पृथ्वी जेनाथी एवा सूर्यमडलनु अनुकरण करती, तथा अहीं अगाडी स्फुरायमान थती एवी आ वेदिकाने तु "तृष्णाना" नामथी ओलखजे?

॥ ४०३ ॥ वली चंद्रना विमानथी बहार जेम ताराओना समूहो, तेम आ हर्षथी मनोहर थएला मंडपमां जेओ रहेला छे, एवा आ महा मोहराजाना ते स्वजनोज आ वेदिकापर खुशी थया थका रही शके छे, बीजाओ रही शकता नथी. ॥ ४०४ ॥ आ तृष्णा नामनी वेदिका पोताने ठेकाणे रही थकीज हमेशां जगतनां मनोरूपी सोइनी पंक्तिने फेरवे छे; तेथी करीने तेणीने हुं अन्यने भमाववानी शक्तिवाला मोहरुपी कमलथी बनावेली मानुं छुं ॥४०५॥ सर्पोनी शय्यापर बेठेला विष्णुनी पेठे, तथा मायामय मंडलमां रहेला ब्रह्मानी पेठे आ वेदिकामां बेठेलो महामोह राजा न सहन थइ शके तेवा प्रबल प्रताप-

अस्यां महामोहनरेश्वरस्य । तिष्ठंति तुष्टाः स्वजना न चान्ये ॥ इतः स्थिता मुत्कलमंरूपे ये । बहिर्यथेंदोर्भगणा विमानात् ॥ ४०४ ॥ स्थानस्थिताऽपि भ्रमयत्यजस्र–मियं जगन्मानससूचिपंक्तिम् ॥ मन्ये तदन्यभ्रमशक्तियुक्त–विमोहमोहोत्पलनिर्मितेयम् ॥ ४०५ ॥ अधिष्ठितो विष्णुरिवाहिशय्यां । ब्रह्मेव मायामयमंरूलस्थः ॥ अस्यां महामोहनृपो निषण्णो भवत्यसह्यप्रबलप्रतापः ॥ ४०६ ॥ गर्जत्यहो मोहनृपः सगर्व–मस्यां स्थितः सिंह इवाचलस्थः ॥ प्रयाति चान्यो निधनं गतोऽस्यां । जाज्वल्यमानज्वलनोपमायाम् ॥ ४०७ ॥ सिंहासनं चेदमुदारबुद्धे । महाविपर्यासमवेहि भास्वत् ॥ घनद्युतिछन्नदिगंतराल–कुतर्करत्नैर्घटितं पटीयः ॥ ४०८ ॥ प्राज्यं हि यन्मोहनृपस्य राज्यं । विभूतयो दिग्जयदीपिका याः॥ महेश्वरानुग्रहजेव शक्ति–स्तदेकहेतु ध्रुवमेतदेव ॥ ४०९ ॥

वालो थाय छे. ॥ ४०६ ॥ अहो! आ वेदिकामां गर्वसहित बेठेलो मोहराजा पर्वतपर रहेला सिंहनी पेठे गर्जना करे छे; तथा बलता अग्नि सरखी एवी आ वेदिकामां जो बीजो कोइ प्राप्त थयो तो ते मृत्यु पामे छे. ॥ ४०७ ॥ वली हे उदार बुद्धिवाला प्रकर्ष! अत्यंत कांतिथी आच्छादित करेल छे दिशाओनो अंतरभाग जेओए एवां कुतर्कोरूपी रत्नोथी घडेलां, तथा चलकतां एवां आ सिंहासनने तुं " महाविपर्यासना " नामथी जाणजे ? ॥ ४०८ ॥ मोह राजानुं जे आवुं

बलवत राज्य छे, तथा तेनी दिग्जयनी दीपिका सरखी जे समृद्धिओ छे, तथा जाणे महादेवनी कृपाथीज उत्पन्न थइ होय नहीं जेम, तेवी जे तेनी शक्ति छे, ते सघलांनो हेतु एक आ सिंहासनज छे ॥४०९॥ आ सिंहासनपरज रहेलो एवो आ मोहराजा लडाइना उच्छृंगवाला एवा पण राजाओने अगम्य थइ पडे छे; अने अहींथी बहार निकलेलो आ मोहराजा गुफामांथी निकलेला शीयालना बालकनी पठे सर्वने गम्य थाय छे ॥४१०॥ अत्यत दृष्टिविषवाला एवा आ मोहराजाने योग्य एवु आ सिंहासन विधाताए शु दृष्टिविषोथी बनाव्युं छे! केमके, भयंकर कांतिवाला एवा आ सिंहासनपर दृष्टि फेकतो थकोज माणस भस्मपणाने पामे छे ॥४११॥ वली जे रेताल मेदान आदिकनी शक्ति देखाडेली छे, ते शक्ति आ

रणोत्सवानामपि नूधवाना- मसौ स्थितोऽत्रैव नवत्यगम्यः ॥ इतोवहिस्त्वेप गतः शृगाल-- वालो गुहाया इव सर्वगम्यः ॥ ४१० ॥ इदं विधाताऽकृत दृग्विपैः किं । नृपस्य योग्यं परदृग्विपस्य ॥ यन्नस्मतामेति जनोऽत्र दृष्टिं । निपातयन्नेव करालकांतौ ॥ ४११ ॥ निदर्शिता या पुलिनादिशक्तिः । सा विष्टरस्यास्य बले निविष्टा ॥ वनस्य याऽनाक्रमणीयताऽसौ । पंचाननस्यैव परः प्रनावः ॥ ४१२ ॥ सिंहासनस्यास्य विकल्पपीठ—प्रनाभिरुन्नासितनूतलस्य ॥ गयामुपादाय जगत् समायां । कालश्चिरं लालयतीव वालम् ॥४१३॥ अत्रोपविष्टं प्रवलप्रताप-- मेनं महामोहनृपं प्रतीहि ॥ अमुष्य जीर्णा जरसाऽप्यविद्या--वीर्यैकपात्रं ननु गात्रयष्टिः ॥४१४॥

सिंहासनना बलमां समाएली छे; अने वननु जे नही ओलंगवापणु बताव्युं, ते (आ राग) केसरीनोज मोटो प्रभाव जाणवो ॥ ४१२ ॥ विकल्पोरूपी पीठप्रभाथी देदीप्यमान करेल छे पृथ्वीतल जेणे एवा सिंहासननी मायायुक्त छायाने मेलवीने काल (रूपी पिता) जगतरूपी पोताना बालकने घणा कालसुधि जाणे लाड लडावतो होय नहीं तेम लागे छे ॥ ४१३ ॥ ते सिंहासनपर बेठेला महाप्रतापी एवा आ मोहराजाने तु जाणजे! तेनु अविद्या (अज्ञान) रूपी शरीर घडपणथी जो के जीर्ण थयुं छे, तो पण वीर्यना एक भाजन सरखु छे; (अर्थात् महा बलवालुं छे) ॥ ४१४ ॥

अनित्य, अपवित्र तथा दुःखरुप एवा संसारमां (प्राणीओने) जे नित्यपणांनी, पवित्रपणांनी अने सुखनी प्रतीति थाय छे, तथा परपुद्गलिक भावोमां जे, आत्मभावनी बुद्धि थाय छे, ते सघलुं आ अविद्यारुपी (ते मोहराजाना) शरीरनुं प्राक्रम छे.॥४१५॥एवी रीतनां मजबूत शरीरनी यष्टिवालो एवो आ मोहराजा जो के घडपणथी जीर्ण थयो छे,तो पण पोताना तेजथी मुकायो नथी; कोनी पेठे ? तो के औषधिओथी बलतां छतां पण नथी बगडेल सुवर्णनी शिलाओनो विलास जेनो एवा मेरुपर्वतनी पेठे. ॥ ४१६ ॥ जगतनी पण उत्पत्तिनो हेतुरुप आ मोहराजा छे; अने तेथी तेनुं " पितामहपणुं " प्रसिद्ध

जगत्यनित्याऽशुचिदुःखरूपे । नित्यत्वपूतत्वसुखप्रतीतिः ॥ अस्याः प्रज्ञाजृंभितमात्मभाव
--बुद्धिः प्रपंचेषु च पुद्गलानाम् ॥ ४१५ ॥ स्वतेजसैतद्दृढगात्रयष्टि–र्न मुच्यतेऽसौ जरसाऽपि
जीर्णः॥अनाविलस्वर्णशिलाविलासःपरिज्वलन्मेरुरिवौषधीभिः॥४१६॥उत्पत्तिहेतुर्जगतोऽप्य
यं–त्पितामहत्वं प्रथितं तदस्य ॥ न लंघयंत्येव निदेशमस्य।नागेंद्रविद्याधरचंद्ररुद्राः॥४१७॥
असौ जगच्चक्रपरिभ्रमैक--व्यापारविस्फारितवीर्यदंडः॥कुलालवत्कानि न चित्रकार्य--भांडानि
लीलाकलितस्तनोति ॥ ४१८ ॥ समुद्रकांचीमपि दंडवद्यः । प्रोल्लालयत्यात्मकरे निधाय
न सोऽपि कोपारुणयाऽस्य दृष्ट्या । पतंतमात्मानमलं विधर्तुम् ॥ ४१९ ॥

थएलुं छे; तथा तेनी आज्ञाने, नागेंद्र, विद्याधर, चंद्र तथा महादेव पण उलंघता नथी. ॥ ४१७ ॥ जगत रुपी चक्रने भमाडवारुप एक व्यापारमां विस्तारेल छे वीर्यरुपी दंड जेणे एवो आ मोहराजा कुंभा- रनी पेठे क्रीडाथी मनोहर थयो थको विचित्र प्रकारनां कार्योरुपी केटलां भाजनोने नथी विस्तारतो ! (अर्थात् घणां भाजनोनें विस्तारे छे.) ॥ ४१८ ॥ जे (प्राक्रमी) माणस समुद्रनी मेख- लावाली (एवी पृथ्वीने) पण पोताना हाथमां लेइने दंडनी पेठे उछाले छे; तेवो माणस पण, आ मोहराजानी क्रोधथी लाल थएली दृष्टिथी पडता एवा पोताना आत्माने धारी राखवाने समर्थ थतो

नथी ॥ ४१९ ॥ भयकर कोपवालो एवो आ मोहराजा ज्यारे मारवा माटे एक (पण) बाणने छोडे छे, त्यारे वज्रमय पिंजरथी पण इद्रना पण प्राणनु रक्षण थइ शकतु नथी ॥ ४२० ॥ महा बलवान एवा आ मोहराजानी तुलनाने क्याए पण कोइ धारण करतु नथी; तथा तेणे सभावित शत्रुने मोटी फुदडीओवाला घुनामां फेरयो छे ॥ ४२१ ॥ एवी रीते मे तारी पासे महा मोहराजानुं वर्णन कर्युं; अने हवे तेना परिवारनु वर्णन हु करु छु ते तु प्रगट रीते साभल ! ॥ ४२२ ॥ वली हे प्रकर्ष ! आवी रीते बोलता एवा मने तु निश्चल दृष्टिवालो थयो थको जोया करे छे, अने प्रकट

अधिज्यधन्वा यदि बाणमेकं । प्रहर्तुमुज्झत्ययमुग्रकोपः ॥ त्राणं तदा वज्रभृतोऽप्यसूनां । न पंजराद्वज्रमयादपि स्यात् ॥ ४२० ॥ विभर्ति कुत्राऽपि महाबलस्य । न कश्चिदस्य प्रतिमल्लभावम् ॥ चिक्षेप संभावितमेषशत्रु–मसंमितावर्त्तविवर्त्तगर्ते ॥ ४२१ ॥ एवं महामोहनृपो। वर्णितः पुरतस्तव॥अधुना वर्णयाम्यस्य । परिवारं शृणु स्फुटम्॥४२२॥ परं वदंतमित्थं मां । निश्चलाक्षो निरीक्षसे ॥ बोधचिन्हं स्फुटं किंचि–न्न धत्से किं न बुद्ध्यसे॥४२३॥प्रकर्षः प्राह मावादी–रित्थं मातुल सांप्रति ॥ तन्नास्ति यत्प्रसादात्ते । न बुद्ध्येऽहं परिस्फुटम् ॥ ४२४ ॥ विमर्श प्राह जानामि । स्फुटं त्वं बुद्ध्यसेऽखिलम् ॥ हासस्त्वयं विनोदार्थं । तव भद्र मया कृतः ॥ ४२५ ॥ जानताऽपि त्वया किंच । मम हर्षप्रवृद्धये ॥ विचारपूर्वकः कार्यः । प्रश्नः प्रस्तुतवस्तुनि ॥ ४२६ ॥

रीते कंइ बोधना चिन्हने जे धारण करतो नथी, तेथी शु तु कइ जाणी शकतो नथी ? ॥ ४२३ ॥ त्यारे प्रकर्षे कह्यु के, हे मामाजी ! तमो मने एम नही कहेता ? केम के, एवी कोइ बाबत नथी, के जेने हुं आपनी कृपाथी प्रगट रीते न जाणी शकु ॥ ४२४ ॥ त्यारे विमर्शे कह्यु के, तुं सघलु प्रगट रीते समजी शके छे, ते तो हु जाणुज छु; पण हे भद्र! फक्त तने आनदित करवा माटे मे आ तारी हांसी करी छे ॥ ४२५ ॥ वली हे प्रकर्ष ! तु जोके जाणकार छे, छतां मारा हर्षनी वृद्धि माटे तारे आ चालता प्रसग

संबंधि विचारपूर्वक मने (कंइक) प्रश्न करवो. ॥ ४२६ ॥ वली तारे फक्त सांभलवाथीज जिज्ञासाने संपूर्ण करवी नहीं; पण आ सघलुं ध्यानमां तारे लेवुं; के जेथी भौतकथानी पेठे थाय नहीं.॥४२७॥त्यारे प्रकर्षे कह्युं के, तुं कहे के ते भौतकथा केवी होय ? अने एवी रीते मनोहर भोजन सरखा आ प्रबंधमां वच्चे ते कथाने शाकतरिके आप ?॥४२८॥ त्यारे विमर्शे कह्युं के हे भद्र ! ते प्रगट कथाने तुं सांभल? कोइक जगाए सदाशिव नामनो एक बेहेरो भौताचार्य छे.॥४२९॥घडपणथी जीर्ण थएला एवा आ सदाशिवने कोइक मशकरा

श्रुतमात्रेण जिज्ञासा ॥ पूरणीया च न त्वया ॥ ऐदंपर्यंतु बोद्धव्यं । माभूद्भौतकथाऽन्यथा ॥ ४२७ ॥ प्रकर्षः प्राह सा भौत--कथा कथय कीदृशी ॥ हृद्यभोज्ये प्रबंधेऽस्मिन् । मध्ये तं शाकमर्पय॥ ४२८ ॥विमर्शः प्राह तां भद्र । कथां शृणु परिस्फुटाम् ॥ बधिरोऽस्ति क्वचिद्भौता--चार्यो नाम्ना सदाशिवः ॥ ४२९ ॥ केनचिज्जरसा जीर्णः । प्रोक्तोऽसौ हस्तसंज्ञया ॥ धूर्तेन हासशीलेन । नोपेक्ष्यो व्याधिरेष ते ॥ ४३० ॥ यन्नीतिः—विषं गोष्ठी दरिद्रस्य । जंतोः पापरतिर्विषम् ॥ विषं परे रता नार्या । विषं व्याधिरुपेक्षितः ॥ ४३१ ॥ आग्रहोऽयं महांस्तस्या--भिनिविष्टो मनस्यथ॥ततः शांतिशिवं प्राह।निजशिष्यमसौ स्फुटम् ॥ ४३२ ॥ गच्छ त्वं वैद्यभवने । मद्बाधिर्यस्य भेषजम् ॥ गृहीत्वा तूर्णमागच्छ । माभूद्वृद्धिर्विलंबतः॥४३३॥

धुताराए हाथनी संज्ञाथी कह्युं के, आ बेहेरापणाना दरदने तारे उपेक्षी मुकवुं जोइए नहीं. ॥ ४३० ॥ नीतिशास्त्रमां पण कह्युं छे के दरिद्रनी सोबत झेर समान छे, प्राणीने पापोनी इच्छा झेरसमान छे, परपुरुषमां रक्त थएली स्त्री झेर समान छे, तथा उपेक्षी मेलेलो व्याधि पण झेर समान छे. ॥४३१ ते ठगनो आ आग्रह तेनां मनमां सज्जड चोंटी गयो। तेथी ते सदाशिवे पोताना शिष्य शांतिशिवने प्रगट रीते कह्युं के, ॥ ४३२ ॥ तुं वैद्यने घेर जा ? अने मारा बधिरपणानुं औषध लेइने तुरत आव ? वखत

जवाथी व्याधिनी वृद्धि न थाय तो सारुं ॥ ४३३ ॥ एक गुरुनी आज्ञानेज वश थएलो एवो ते शांतिशिव पछी वैद्यने घेर गयो, अने त्यां तेणे वैद्यने पोताना पुत्रने शिक्षा आपतो जोयो ॥ ४३४ ॥ तेने ना पाड्या छतां पण ते रमत रमीने बहु मोडो घेर आव्यो हतो; तेथी क्रोधांध बुद्धिवाला वैद्ये मजबूत दोरडु लावीने तेने बांध्यो ॥ ४३५ ॥ पछी अत्यत रडता एवा तेने ते आचार्य निर्दय थइने लाकडीओथी मारवा लाग्यो, त्यारे शांतिशिवे कह्यु के, अहो ! तु आने शामाटे मारे छे ? ॥ ४३६ ॥ त्यारे वैद्ये कह्यु के, आ लुच्चो कंइ पण सांभलतो नथी, माटे तेनु बेहेरापणुं मटाडवाने हु तेने मारुं

गतोऽसौ वैद्यसद्मने । गुर्वाज्ञैकवशंवदः ॥ दृष्टो वैद्यः स च तदा । स्वपुत्रं शिक्षयन् स्थितः ॥ ४३४ ॥ निषिद्धोऽपि चिरं क्रीडां । कृत्वासावागतो गृहे ॥ वैद्यः क्रोधांधधीरज्जुं । दृढां लात्वा बबंध तम् ॥ ४३५ ॥ निर्दयं ताडयामास । रटंतं लकुटैः कटु ॥ तदा शांतिशिवः प्राह । किमेनं ताडयस्यहो ॥ ४३६ ॥ वैद्यः प्राह शृणोत्येषः । पापात्मा न कथंचन ॥ ततोऽहं ताडयाम्येन—मेतद्बाधिर्यशांतये ॥ ४३७ ॥ लग्ना भार्या करेऽस्याथ । वैद्यस्य विनिवारणे ॥ स प्राह नैव मोच्योऽय—मद्यापि न शृणोति यः ॥४३८॥ गच्छेतस्त्वं गतिनोऽचे—त्तवापीयं भविष्यति ॥ इत्थं निवार्यमाणाऽपि । लग्ना सा तेन ताडिता ॥ ४३९ ॥ ततः शांतिशिवो दध्यौ । ज्ञातं भट्टारकौषधम् ॥ प्रश्नेन किं बहिर्वाचां । निर्गमश्रमकारिणा ॥ ४४० ॥ निर्गत्याऽसौ ततस्तूर्णं । माहेश्वरगृहं गतः ॥ याचिता तेन रज्जुश्च । तैर्नातिपरुपार्पिता ॥ ४४१ ॥

छु ॥ ४३७ ॥ पछी ते वैद्यनी स्त्री तेने निवारवा माटे हाथे वलगी, त्यारे ते वैद्ये कह्युं के, आने हुं (आजे) छोडनार नथी, केमके हजी पण ते सांभलतो नथी ॥ ४३८ ॥ माटे चाली जा अहींथी ? नहीतर तारा पण तेज हाल थशे; एवी रीते वार्या छतां पण ते (हाथने) वलगी रही, त्यारे तेणे तेणीने पण ताडना आपी ॥ ४३९ ॥ पछी शांतिशिवे विचार्यु के, भट्टारकनु औषध हवे मे जाण्यु; माटे हवे बहार वचन कहाडवाना श्रमवाला प्रश्ननु शु जरुर छे ? ॥ ४४० ॥ पछी त्यांथी निकलीने ते तुरत माहेश्वरोने घेर

गयो; तथा एक दोरडुं माग्युं; त्यारे तेओए तेने बहु मजबूत दोरडुं आप्युं नहीं (अर्थात् जीर्ण प्राय दोरडुं आप्युं.) ॥ ४४१ ॥ त्यारे शांतिशिवे कह्युं के, आवा दोरडानुं मारे काम नथी; मारे तो अत्यंत मजबूत दोरडानुं कामछे. ॥ ४४२ ॥ त्यारे माहेश्वरोए तेने तेवुं मजबूत दोरडुं आप्युं; अने पूछयुं के, हे भट्टारक! आ दोरडानुं तारे शुं काम छे? ॥ ४४३ ॥ त्यारे तेणे कह्युं के, पूज्य एवा सदाशिव महात्माने तेनुं प्रयोजन छे; एम कहीने ते मठमां गयो. ॥ ४४४ ॥ पछी त्यां गुरुने जोइने तेणे भ्रुकुटीना भंगथी भयंकर मुख कर्युं

ततः शांतिशिवः प्राह । नाऽनया मे प्रयोजनम् ॥ रज्ज्वा ममाऽतिपारुष्य–शालिन्यास्ति प्रयोजनम् ॥ ४४२ ॥ ततो माहेश्वरैस्तस्मै । तादृशी रज्जुरर्पिता ॥ पृष्टं च तैः किमनया । कार्यं भट्टारकाऽस्ति ते ॥ ४४३ ॥ स प्राह कार्यमनया । सदाशिवमहात्मनाम् ॥ सुगृहीताभिधानाना–मित्युक्त्वाऽसौ गतो मठे ॥ ४४४ ॥ तत्र दृष्ट्वा गुरुं चक्रे । वक्त्रं भ्रूभंग भीषणम् ॥ बद्ध्वा स्तंभे च तं रज्ज्वा । ऽताडयल्लकुटैर्दृढम् ॥ ४४५ ॥ बद्धारटिं स तं रेजे । निघ्नन् भ्रूभंगभीषणः ॥ क्षेत्रपाल इवाकृष्टः । शाकिनीं विनिवारयन् ॥ ४४६ ॥ ऐयुर्माहेश्वरास्तत्र । प्रतिकारदिदृक्षवः ॥ दृष्टः शांतिशिवो बाढं । ताडयंस्तैः सदाशिवम् ॥ ४४७ ॥ तैरुक्तं किं करोष्येत–त्स प्राह न शृणोत्ययम् ॥ पापात्मा तेन हन्म्येनं । श्रोष्यत्यस्मात्किलौषधात् ॥ ४४८ ॥

तथा तेने थंभा साथे दोरडांथी मजबूत बांधीने लाकडीओथी मारवा लाग्यो. ॥ ४४५ ॥ अत्यंत बूमो पाडता एवा ते आचार्यने मारतो थको, तथा भ्रूकुटिना भंगथी भयंकर थएलो एवो ते, शाकिनीने निवारताथका क्षेत्रपालनी पेठे शोभवा लाग्यो. ॥ ४४६ ॥ हवे प्रतिकारने जोवानी इच्छावाला माहेश्वरो त्यां आव्या; त्यां तेओए सदाशिवने अत्यंत मारता एवा शांतिशिवने जोयो. ॥ ४४७ ॥ त्यारे तेओए कह्युं के, आ तुं शुं करे छे? त्यारे तेणे कह्युं के, आ पापी सांभलतो

नथी, माटे तेने मारु छुं; अने आ औषधथी खरेखर ते सांभलशे ॥ ४४८ ॥ हवे प्राण रुपी वांसना आस्फोटना शब्द सरखा महा आक्रंदने सदाशिवरुपी पर्वत विस्तारवा लाग्यो, तेथीमाहेश्वरोने दया आवी ॥४४९॥ हवे तेने छोडववाने तेओ इच्छवा लाग्या; पण ते शांतिशिव निवर्त्यो नहीं; पण उलटो ते निवारनाराओने मारवा उठ्यो ॥ ४५० ॥ हवे तेओए ते शांतिशिवने गांडो जाणीने एकठा थइने बांध्यो; अने ते राक्षसथी ते पूज्य सदाशिवने छोडाव्यो ॥ ४५१ ॥ एवी रीते बंधन युक्त

महाक्रंदमथ प्राण—वंशस्फोटरवोपमम् ॥ सदाशिवगिरिस्तेने । दयां माहेश्वरायपु॥४४९॥ तं मोचयितुमीपुस्ते । न चाऽयं स्म निवर्तते ॥ प्रत्युताभ्युत्थितो हंतुं । तमांस्तान् विनिवारणे ॥ ४५० ॥ ववंधुस्तेऽथ संभूय । ग्रहाविष्टमवेत्य तम् ॥ राक्षसान्मोचयामासु—स्तस्मात्पूज्यं सदाशिवम् ॥ ४५१ ॥ बद्धोऽपि प्रललापाऽसौ । किमहं भवतां गिरा॥औषधं न करिष्यामि । गुरोः स्वस्य हितेच्छया ॥ ४५२ ॥ वैद्यस्य वचसैवाह । तस्य स्थास्यामि नान्यथा ॥ समाहूतस्ततो वैद्यो । वृत्तांतश्च निवेदितः ॥ ४५३ ॥ प्राह सोऽथ हसन्नंत—र्बधिरोनार्य मत्सुतः ॥ शास्त्रार्थश्रवणालस्या—न्मया रोपात्स ताडितः ॥ ४५४ ॥ जातस्तव प्रभावाच्च । स्वस्थो भट्टारको ह्ययम् ॥ त्वयेदमौषधं तस्मा—न्न कर्तव्यमतः परम् ॥ ४५५ ॥

थएलो एवो पण ते बबडवा लाग्यो के, शु हु तमारा कहेवाथी, हितनी इच्छाथी मारा गुरुनुं औषध नहीं करु ॥ ४५२ ॥ वली हु ते वैद्यना वचनथीज आम करु छुं; अमथो करतो नथी; पछी तेओए वैद्यने बोलाव्यो; अने आ वृत्तांत निवेदन कर्यो ॥ ४५३ ॥ त्यारे ते वैद्य मनमां हसतो थको कहेवा लाग्यो के, हे आर्य ! मारो पुत्र कइ बेहेरो नथी; (तेना) शास्त्रार्थ सांभलवाना आलसथी मे क्रोधथी तेने तो मार्यो हतो ॥ ४५४ ॥ वली तारा प्रभावथी आ भट्टारक हवे स्वस्थ थयो छे, माटे हवे

पछीथी तारेआ औषध करवुं नहीं. ॥ ४५५ ॥ पछी वैद्ये कहेला शांतिपाठथी गएल छे घेलछापणुं जेनुं एवो ते शांतिशिव माहेश्वरोथी मुकायो थको शांतताने भजवा लाग्यो. ॥ ४५६ ॥ इति भौतकथानिका ॥ माटे सांभलवामात्रना ग्रहण करवाथी एवी रीते शांतिशिवनी पेठे उलटुं कार्य थइ जाय, माटे हे प्रकर्ष! तने हुं एवी रीते प्रेरणा करूं छुं. ॥ ४५७ ॥ पदवाक्य तथा महावाक्यना तात्पर्योथी अर्थनी प्राप्ति थाय छे माटे तात्पर्यार्थ बलवान छे;अने बाकीना अर्थो तो तेना पेटामां रहेला छे. ॥४५८॥ सांभलवामात्रनुं ग्रहण तो तेना जाणनाराओए शत्रूत्थान सरखुं जाणेलुं छे; पण क्रमिकार्थना

विनिवृत्तग्रहावेशः।शांतिकाद्वैद्यभाषितात् ॥ शांतिं शांतिशिवो भेजे । मुक्तो माहेश्वरैरथ ॥ ॥ ४५६ ॥ इतिभौतकथानिका—श्रुतमात्रंग्रहादित्थ—मसमंजसकारिता ॥ भवेत् शांतिशिवस्येव । तदित्थं प्रेर्यसे मया ॥ ४५७ ॥ पदवाक्यमहावाक्य—तात्पर्यैरर्थसंगतिः॥तात्पर्यार्थोऽत्र बलवान् । शेषास्तन्मुखवीक्षिणः ॥ ४५८ ॥ श्रुतमात्रग्रहस्तदज्ञैः । शत्रूत्थानसमः स्मृतः॥ क्रमिकार्थग्रहोद्बुद्ध—स्तात्पर्यार्थस्तु तज्जयः ॥ ४५९ ॥ पल्लवग्राहिभिर्मूढैः । शास्त्रार्थः को न लुप्यते ॥ अंधेभज्ञानगत्यांशे । पूर्णार्थारोपगर्वितैः ॥ ४६० ॥ संतुष्टव्यमतो भद्र । श्रुतमात्रेण न त्वया ॥ रसस्तात्विक आस्वाद्यः । प्रश्नचर्वणया मुहुः ॥ ४६१ ॥ प्रकर्षः प्राह यद्येवं । ततो ज्ञातं मयाऽखिलम् ॥ महानद्यादिवस्तूनां । भेदस्तुपरिपृच्छ्यते ॥ ४६२ ॥

ग्रहणथी जणाएलो तात्पर्यार्थ तो ते शत्रुने जीतनारो छे. ॥ ४५९ ॥ आंधला माणसने थएला हाथीना ज्ञाननी पेठे, लेशमात्र जणाते छते संपूर्ण जाणपणाना डोलथी गर्वित थएला, तथा उपरछली बाबतोने ग्रहण करता एवा मूर्ख लोकोथी क्या शास्त्रार्थनो लोप थतो नथी? ॥४६०॥ माटे हे भद्र! तारे फक्त सांभलवामात्रथीज संतोष नहीं मानवो; पण प्रश्नरूप चाववाए करीने वारंवार तात्विक रसनो स्वाद तारे लेवो. ॥४६१॥ त्यारे प्रकर्ष बोल्यो के,जो एम छे,तो में सर्व जाण्युं; हवे हुं ते महानदी आदिक वस्तु-

ओना भेद पूछु छुं ॥४६२॥ पछी विमर्शे तेओना भेदना अर्थोनो विस्तार कर्यो;अने ते विचक्षणने नरवाहन राजाए पण पूछयो ॥४६३॥ पछी तेणे पण ते महान राजाने ते भावार्थ जणाव्यो; हवे अग्रहीतसंकेता (सुललिता) ससारि जीवने (अनुसुंदर चक्रीने) पूछवा लागी के, ॥ ४६४ ॥ आ महानदी आदिक वस्तुओनो भेद तारे मने पण कहेवो, केम के, अहो ! हु पण तेओनुं खरु स्वरुप जाणती नथी ॥४६५॥ त्यारे ससारि जीवे कह्यु के, हे भद्रे ! प्रकट उदाहरण विना ते स्वरूप ताराथी जणाय तेवु नथी; माटे ते दृष्टांत हु तने कहु छु ॥४६६॥ भुवनोदर नामना नगरमां अनादि नामे महान् राजा छे; तेने संस्थिति नामनी

